Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यस महाकाव्यको अर्को महत्वपूर्ण विशेषता भनेको यसका पद्यमा पाइने अन्त्यानुप्रास हो। यो अन्त्यानुप्रास पनि दुई थरी छ-एउटा श्लोकका पहिला दोस्रा र तेस्रा चौथा पाउमा हुने अन्त्यानुप्रास। यसको संख्या धेरै छ। अर्को दोस्रो र चौथो पाउमा मात्र हुने अन्त्यानुप्रास। यसको संख्या थोरै छ। यी दुवैले यस महाकाव्यको महिमा बढाएका छन्। अहिलेका संस्कृत कविहरूको त कुरै छाडौं, उहिलेका विश्ववन्द्य महाकवि कालिदास माघ भारवि आदिले समेत गर्न नम्र्याएको यो कठिन काम महाकवि आत्रेयका हनूमदयनम् महाकाव्यमा देख्न पाइन्छ।

अन्त्यमा गुरू डा. विष्णुराज आत्रेय लाटोसाथीमा हनुमदयनम् महाकाव्यका लागि हार्दिक अभिनन्दन गर्दछु। साथै हनुमानचालिसाका अनुवादक हनुमान्का भक्त महाकवि डा.आत्रेयका कविनिबद्धवक्ता लक्ष्मणको बोलीमा लोली मिलाउँदै हर्यांशभूत हनुमान्लाई नमन गर्दै तलको श्लोक सारेर विदा हुन्छु –

नवोदयं खे स्थितमर्कमेनं
रक्तं फलं स्वादु च मन्यमानः।
यः सूर्यलोकं प्लवते सकाम
स्तं वायुसूनुं मनसा प्रणामः ॥१२।९४॥

बूढानीलकण्ठ स्कूल,
काठमाडौं।

– मुकुन्द शर्मा

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रथमः सर्गः

(अनुष्टुप्छन्दः)

गिरिजां गिरिजाजानिं विशाखं शिखिवाहनम् ।
एकदन्तमहं नौमि शुभदन्तमनेकदम् ॥१॥

वाग्देवी विमलीकुर्यान् मलीमसमिदं मनः ।
तुषारधवला दद्यादमलं धवलं यशः ॥२॥

अञ्जनानन्दनं वन्दे सज्जनानन्दकारणम् ।
दग्धं येनाञ्जसा सर्वं सीतायाः शोककाननम् ॥३॥

एषा माता शारदास्नेहमूर्त्ति-
विद्वान् योगी मत्पिता देवराजः।
विद्वद्वर्यो मद्गुरू रश्मिराजः
पूज्यानेतान् नौम्यहं विष्णुराजः ॥४॥

स्कान्दं पाद्मं वायवीयं पुराणं
शैवं शाक्तं ब्रह्मवैवर्तमेवम् ।
अन्यान्येवं वीक्ष्य रामायणानि
वाल्मीकीयाऽध्यात्मवासिष्ठकानि ॥५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्रुतं चरन् वै मधु विन्दतीति
भ्रमन्नतो रामकथाटवीषु ।
हनूमदीयानि सुमानि चिन्वन्
निगुम्फ्य पद्येषु पुरस्करोमि ॥६॥

आसीदेका देवलोके वारस्त्री पुञ्जिकस्थला ।
रूप-यौवन-सम्पन्ना कामुकी विश्रुता पुरा ॥७॥

विनिष्क्रान्ता गृहात् जातु कुत्रचिद् गन्तुमुद्यता
वृक्षाधस्तात् स्थितं कञ्चिद् सा ददर्श मुनिं तदा ॥८॥

निगृहीतेन्द्रियग्रामो धीरः स्तिमित-लोचनः ।
भस्मोद्धूलित-सर्वाङ्गस्तपति स्म तपोधनः ॥९॥

मनोज्ञं तमृषिं दृष्ट्वा चपला पुञ्जिकस्थला ।
स्तब्धा क्षणं स्थिता तत्र मुग्धा तद्रूप-सम्पदा ॥१०॥

तपसानेन किं योगिन् ?पश्य मां नवयौवनाम् ।
ब्रह्मानन्दं प्रदास्यामि जटिन् ? त्वमुपभुङ्क्ष्व माम् ॥११॥

तपस्विनं वदन्त्येवं स्वर्वेश्योपजहास च ।
वामा सकामातिशयं प्रमत्ता वानरीव ह ॥१२॥

मुनेः सन्निधिमागत्य चापल्यं कुर्वती स्थिता ।
कदाचित् तु कपोलौ द्वौ जातु श्मश्रु चकर्ष सा ॥१३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथ रुष्टो मुनिर्हस्ते जलमादाय शप्तवान् ।
चपले रु वानरी भूया इत्युक्त्वा स प्रतस्थिवान् ॥१४॥

मुनेः शापप्रभावेणवानरीं स्थितिमागता ।
पश्चात्तापं प्रकुर्वाणा व्यलपत् पुञ्जिकस्थला ॥१५॥

स्वतो नैव कृतं चैतत् प्रेरितास्मि बिडौजसा ।
मनागपि न मे दोषो मुने ? रोषन्तु मा कृथाः ॥१६॥

स्वर्वेश्या सानुयाता तं रोदं रोदं निरन्तरम् ।
विमूढां मां दयस्वेति मुने ? जातमसाम्प्रतम् ॥१७॥

महाकारुणिकोऽसि त्वं सापराधास्म्यहं प्रभो
प्रमादजमनौचित्यं क्षमाशील क्षमस्व भोः ? ॥१८॥

प्लुष्टो येनाऽग्निना हस्तः स तेनैवोपशम्यते ।
भवच्छाप-प्रभावोऽयं दयसे चेत् प्रहीयते ॥१९॥

पापं भवति निर्बीजं यद् दग्धं तपसोऽग्निना ।
शापदाहः प्रशान्तःस्यात् त्वत्-कृपामृत-वारिणा ॥२०॥

लुठन्तीं तच्चरणयोः प्रार्थयन्तीं निरन्तरम् ।
रुदतीं तां भृशं दृष्ट्वा मुनेश्चित्तं च विद्रुतम् ॥२१॥

यत् स्यन्दति जलं नद्या न प्रत्यावर्तते क्वचित् ।
तपस्विनां शाप-वाक्यं निष्फलं नास्ति कुत्रचित् ॥२२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

किन्तु दिष्ट्या मतिभ्रष्टां त्वां दृष्ट्वा दययान्वितः ।
अल्पीकरोमि मत्-शापप्रभावं तामवोचत ॥२३॥

कापेयं मानुषं वापि स्वेच्छयान्यत्र जन्मनि ।
परिवर्तयितुं रूपं शक्यमित्यब्रवीऽमुनिः ॥२४॥

सा खेदखिन्ना वारस्त्री मनस्तापं प्रकुर्वती ।
अशक्ता जीवितुं प्राणान् जहौ कालेन दुर्मतिः ॥२५॥

अन्य जन्मनि सा जाता दिष्ट्या शापाच्च तन्मुनेः ।
कुञ्जरस्य कपेः पुत्री भूत्वा नाम्नाञ्जना सु-भे ॥२६॥

गुणी भवति संस्काराद् जडोऽपि किल जन्मना ।
यशो भवति धर्मेण कृती भवति कर्मणा ॥२७॥

भूत्वैवं वानरी जातु कदाचित् सा तु मानुषी ।
दिने दिने प्रववृधे कन्यका पितृ-वेश्मनि ॥२८॥

कन्या श्रीरूपिणी ज्ञेया शिक्षा-दीक्षा-समन्विता ।
संस्कर्त्री परिवाराणां तथा संस्कृति-वाहिका ॥२९॥

अशिक्षिता तु या कन्या भवेत् पित्रोस्तु शोकदा ।
शिक्षया कुशला सैव तयोः पत्युश्च हर्षदा ॥३०॥

गृहकार्ये सदा मातुः बहिःकृत्ये पितुस्तदा ।
सहायिकाञ्जना जाता रात्रिन्दिवमतन्द्रिता ॥३१॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षया दीक्षया चाथ शिष्टाचारेण संयुता ।
रूप-शील-गुणैराढ्या काम्या यौवन-सम्पदा ॥३२॥

कन्या वराय दातव्या समये शान्ति-कामिभिः ।
अन्यथा दूयते चित्तं चिन्ता-शङ्कापकीर्तिभिः ॥३३॥

सुमेरौ काञ्चन-गिरौ कश्चित् प्लवग-यूथपः ।
केशरीति सुविख्यातः योऽञ्जनामुदुवाह ह ॥३४॥

अञ्जनाकेशरी चोभौ सानन्दं समतिष्ठताम् ।
सर्वं सौख्यं तयोरासीद् परित्यज्यानपत्यताम् ॥३५॥

तपश्चकार कठिनं पुत्रकामा तदाञ्जना ।
शिवस्य चाशुतोषस्य कानने सा कुथासना ॥३६॥

महादेवस्तपःप्रीतो वरं ब्रूहीति तां ब्रुवन् ।
उपस्थितः पुरस्तस्याः त्रिशूल-डमरू वहन् ॥३७॥

सोवाच तं प्रणम्याथ धन्य-धन्याऽस्म्यहं विभो ? ।
गर्भान्मे तनयो भूत्वा जननं गृह्यतां प्रभो ? ॥३८॥

महादेवोऽब्रवीदेषाभिलाषा सफलास्तु ते ।
रुद्रश्चैकादशो भूत्वा जनिष्येऽहं तवोदरे ॥३९॥

लब्ध्वा वरं गृहं गत्वा भक्त्या केशरिणं पतिम् ।
नत्वा तदोदन्तजातं न्यवेदीत् सा सविस्तरम् ॥४०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रतीक्षमाणा सा देवी महेशं तदनन्तरम् ।
तपो व्रतं कीर्तनञ्च कुरुते स्म निरन्तरम् ॥४१॥

तदाऽभूत् रघुवंश्यानां राजधानी तु विश्रुता ।
निकषा सरयूतीरमयोध्येति सुकीर्तिता ॥४२॥

अभून्नृपो दशरथः पत्नीत्रितय-संयुतः ।
जीवनं यापयन्नेवं निरपत्याधिदुःखितः ॥४३॥

अनुसृत्य वशिष्ठस्य वाक्यं कुलगुरोर्नृपः ।
पुत्रेष्टिनामकं यज्ञं चिकीर्षुरभवत् ततः ॥४४॥

तदासीत् कौशिकीतीरे विभाण्डकमुनिः श्रुतः ।
उपेत्य नन्दनसमं तपोवनमधिष्ठितः ॥४५॥

उपकण्ठं पुष्करिण्यास्तप्तवान् स तपो महत् ।
हरिण्या गर्भतस्तस्य श्रृङ्गीत्याख्यः सुतोऽभवत् ॥४६॥

यदैव सषुवे सूनुं सा मृगी तु दिवं ययौ ।
पालितः पोषितःपित्रा विद्यावित्तः क्षितौ बभौ ॥४७॥

पुत्री दशरथस्याऽभूत् तेन सार्धं विवाहिता ।
शान्ता नाम्नी गुणैराढ्या द्वात्रिंशल्लक्षणान्विता ॥४८॥

गिरेरधस्ताद् विपिने पर्णशालां सुनिर्मिताम् ।
यत्र रम्ये मधुवने दम्पती चाऽध्यतिष्ठताम् ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृपेण यज्ञसम्पत्त्यै मुनिः शृङ्गी निमन्त्रितः।
इष्टिं चक्रे सपत्नीकोऽयोध्यां तामभ्युपेत्य सः ॥५०॥

यज्ञदेवः प्रादुरभूत् मखान्ते होमकुण्डतः।
गृहीत्वा पायस-स्थालीं स तस्थौ नृपतेःपुरः ॥५१॥

राजन् ? धन्योऽसि वन्द्योऽसि हविरेतत् प्रगृह्यताम् ।
विभज्य त्रिषु भागेषु राज्ञीभ्यश्च प्रदीयताम् ॥५२॥

इत्युक्त्वान्तर्दधे देवो मुदितं भूपतेर्मनः ।
कौशल्यायै ददावर्धं हविःशेषं द्विधा पुनः ॥५३॥

कृत्वा चैकं तु कैकेय्यै व्यतरत् नृपतिस्तदा ।
अवशिष्टं द्विधा कृत्वा माध्यमेन तयोर्मुदा ॥५४॥

सुमित्रायै सुवासिन्यै राजा प्रीतमना ददौ
मलिनं वदनं तासां कान्त्या द्विगुणितं बभौ ॥५५॥

गृहीत्वा पायसं हन्त कैकेयी भोक्तुमुद्यता ।
एका गृध्री समागत्य तत् चञ्च्वादाय निर्गता ॥५६॥

सहसैवं रिक्तहस्ता म्लाना जातातिदुःखिता ।
उभे राज्ञौ स्वकीयांशात् प्रादत्तां सा मुदं गता ॥५७॥

गृध्री तु व्योम-मार्गेण साकेतात् निर्गताचिरम् ।
प्राविशद् हिमवद्देशं शान्तं शुक्लं मनोहरम् ॥५८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुमेरोरुपकण्ठञ्च यत्र नीलाचलाः स्थिताः ।
स्वर्णाभाः गिरयो येषामधस्तात् गण्डकी शुभा ॥५९॥

काकवेणीति नाम्नैकस्तीर्थस्त्रैलोक्यविश्रुतः ।
डीयमाना तु सा गृध्री तमुद्दिश्य जगाम ह ॥६०॥

हविःपुटकमादाय यान्तीं चञ्चुपुटेन तां ।
सवेगमनुधावन् स वायुदेवः समीयिवान् ॥६१॥

झञ्झावातो ववौ तीव्रं गृध्री वेपथु-विक्लवा ।
कृतप्रयत्नाऽपि हविर्गोपितुं न शशाक सा ॥६२॥

वायोर्हस्तगतं जातं तस्याश्चञ्चुच्युतं हविः।
तदादाय मरुत् यातस्ततो मेरुगिरिं प्रति ॥६३॥

शम्भुना प्रेरितश्चेत्थं पवनस्त्रिपुराऽरिणा ।
प्राप्तः केशरिणो हर्म्यं स्थितोऽसौ यत्र साऽञ्जना ॥६४॥

नाऽन्या काऽपि तु सा गृध्री स्वर्वेश्याऽसीत् सुवर्चला ।
विदिता मोहिनीत्वेन ब्रह्मलोकेऽतिचञ्चला ॥६५॥

ब्रह्माणं प्रति सा वामा कुचेष्टितमचेष्टत ।
गृध्री भूया इति स्रष्टुस्तया शापोऽप्यलभ्यत ॥६६॥

सा भृशं प्रार्थितवती कारुण्याय स्वयम्भुवम् ।
क्षम्यतां भगवन्नेवं मया मूढतया कृतम् ॥६७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदा सुवर्चलायान्तु दयालुश्चतुराननः ।
तामूचे देवतावाक्यमन्यथा न कदाचन ॥६८॥

गत्वेतस्त्वमयोध्यायां प्राप्य पुत्रेष्टिमण्डपम् ।
हस्तादाच्छिद्य कैकेय्या हवेरंशञ्च पायसम् ॥६९॥

यज्ञस्थलात् ततः क्षिप्रमुड्डीयस्व सपायसा
झञ्झावातं समायान्तं द्रक्ष्यसि त्वं विहायसा ॥७०॥

त्वच्चञ्चुपतितं यज्ञशेषं वायुर्ग्रहीष्यति ।
कृत्वैतद्दैवतं कार्यं शापान्मुक्ता भविष्यसि ॥७१॥

विधिरन्तर्दधे गृध्रीमेवमुक्त्वा सुवर्चलाम् ।
शाप-मुक्त्यै प्रार्थयन्तीं नितरां कष्ट-विह्वलाम् ॥७२॥

हिताय साऽञ्जना देव्याः कृत्यमेवं विधं व्यधात् ।
ततो मुक्ता विधेः शापात् ब्रह्मलोकं पुनर्ह्यगात् ॥७३॥

सैषा गृध्री पूर्वमेव सुतमेकमकजीजनत् ।
नाम्ना काकभुशुण्डीति स लोके विश्रुतोऽभवत् ॥७४॥

एकदा चाऽञ्जनाजानिः कार्यजातेन केनचित् ।
गृहाद् बहिर्गतश्चासीत् प्रातरेव स कुत्रचित् ॥७५॥

पतिं प्रतीक्ष्यमाणाऽभूदञ्जना काम-मानसा ।
विहाय वानरं रूपं कपिरूपं गृहाण सा ॥७६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पीतां शाटी रक्तदशां चोलं लोहितरागकम् ।
दधाना सा न्यधात् भाले तिलकं दीप्ततारकम् ॥७७॥

सुन्दरी साऽञ्जना देवी नेत्रयोश्च कृताञ्जना ।
गवाक्षात् न्यक्षिपद् दृष्टिं कपिराजगृहाङ्गना ॥७८॥

क्षणानां क्षेपणायैव ययौ सोपवनं प्रति ।
जिघ्रन्ती पवनोद्धूतं हविर्गन्धं तदा पथि ॥७९॥

वायुर्व्यधूनयत् मन्दं केशान् शाटीं तदञ्चलम् ।
कटिं कपोलौ पस्पर्श पुत्रैषिण्याः कुचद्वयम् ॥८०॥

गचछन्तीमञ्जनामग्रेऽनुजगाम स पृष्ठतः ।
श्रोत्रान्तिकं जात्वभवत् लपन् गुह्यमिवाग्रतः ॥८१॥

प्रत्यङ्गमङ्गनायाश्च तदानङ्गः समाविशत् ।
प्रभ्रमन्त्या उपवने भृशं सोत्कण्ठिताऽभवत् ॥८२॥

हंसौ जलाशये वेद्यां मयूरौ विटपाश्रये ।
रममाणौ मृगावास्तां मृदुले स्वादु-शाद्वले ॥८३॥

चुकूज कोकिलो वृक्षे हूयमानः कुहूः कुहूः
दधौ मदन-चापल्यं पवनः स मुहुर्मुहुः ॥८४॥

काम-प्रवेदनोद्विग्नाञ्जना कुञ्जं प्रविश्य च ।
तत्र प्रसूनशय्यायां समासीनाभवत् किल ॥८५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पवनो मदनाविष्टः समागत्य तदन्तिकम् ।
शाटीमुत्सारयामास चिकीर्षुः स्मर–चापलम् ॥८६॥

पृथुलं विस्तृतं तस्या नितम्बं स न्यभालयत्।
तदुन्नतावुरोजौ च विलोक्य मुदितोऽभवत् ॥८७॥

रम्भास्तम्भेन सादृश्यं दधद् जङ्घाद्वयं किल ।
ऊरू च संहतौ तस्या वायुदेवो ददर्श ह ॥८८॥

मीनाक्षीं तां मेनकां वा रम्भां वा किमु ! चोर्वशीम् ।
मारुतो विद्रुतो नूनं दृष्ट्वैवाऽनिन्द्यसुन्दरीम् ॥८९॥

स्पृशन् पुनः कपोलौ च चूचुकं चिबुकं मरुत् ।
चुचुम्ब तस्या निभृतं साप्यानन्दमिवान्वभूत् ॥९०॥

हठादेवं केशरिणः पत्नी शय्या–समुत्थिता ।
विरता रतिकामात् सा प्रकृतिस्थाब्रवीत् तदा ॥९१॥

कोऽसि पायसगन्धि ? त्वं किङ्करोस्यकुतोभय ? ।
योऽसि सोऽसि प्रादुरभूरन्यथा त्वां शपे शठ ? ॥९२॥

स्वकीय–कृत्यतो भीतो वायुः साक्षादुपस्थितः ।
वदन् हविर्ददौ तस्यै रुद्रेणाहं प्रचोदितः ॥९३॥

इष्टं पुत्रेष्टिना भद्रे ? राज्ञा दशरथेन ह ।
इदं हविर्यज्ञफलं त्वमेतदवधीरय ॥९४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुत्र-कामे ? मया दत्तं पायसं रुद्र-चोदितम् ।
तन्वि ? भक्षिष्यसीदं चेत् लप्स्यसे सूनुमद्भुतम् ॥९५॥

अञ्जनातिप्रसन्नाभूत् श्रुत्वैवं वायुनोदितम् ।
प्रार्थयत् क्षम्यतां देव यदज्ञानान्मयेरितम् ॥९६॥

सरला निरस्त-दर्पा
स्तुत-भर्गा साञ्जना तत्र ।
भुक्त्वा हविस्तु जाता
धृत-गर्भा प्रमुदिता सद्यः ॥९७॥

आत्रेयोपाऽभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये प्रथमः सर्ग ईरितः ॥९८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वितीयः सर्गः

(सुन्दरीच्छन्दः)

आरुणीं श्रियं धारयन्नसौ
भास्करो ययौ वारुणीं दिशम् ।
अञ्जनाननं कान्तिसंयुतं
कुक्षिगो यतः शङ्करः स्वयम् ॥१॥

अञ्जनाऽभिधा केशरिप्रिया
पायसीं कथां वक्तुमातुरा ।
कुर्वती गृहेऽन्तर्बहिस्तदा
कालमक्षिपत् प्राङ्गणस्थिता ॥२॥

वत्स-वत्सला पीवरस्तनी
गौरियं वनाद् गोष्ठमागता ।
पातुमीहिवान् तत्स्तनन्धयः
सोत्सुकं सुधा-सन्निभं पयः ॥३॥

शावकाः प्रियाः कोटरस्थिताः
तान् विहाय याऽहर्मुखे गता ।
सायमेत्यतः सा विहायसा
पक्षिणी स्वकं वासमागता ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आदिनं रतं कृष्टिकर्मणि
गोहिनीकुलं गेहमागतम् ।
विस्मृतक्लमं वीक्ष्य सन्ततिं
पाययन्त्त्वभूत् तत्पयोमृतम् ॥५॥

बालसंहतिर्मोदतां गता
मातरो निजा आगता इति ।
प्राङ्गणे स्वके खेलने रताः
लोकगीतिकां ते जगुः किल ॥६॥

सान्ध्यसूचकं सायमेत्यतः
कूलमाययौ तत्कुलं मुनेः ।
सस्वरं ततो मन्त्रमुच्चरत्
पूतवारिणा स्नानमाचरन् ॥७॥

लोहितप्रभैः सूर्यरश्मिभि-
स्तन्नभस्तलं रक्तता गतम् ।
तस्य छायया स्यन्दिनीजलं
शोणकान्तिमत् लोहितायते ॥८॥

दुर्जनोऽपि चेत् साधुसङ्गतो
लब्धसद्गुणः सज्जनायते ।
जातु सज्जनो दुष्टसङ्गतः
कापथे चरन् दुर्जनायते ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राष्ट्रघातिभिः शस्त्रधारिभि-
निर्दयं हता देशवासिनः ।
शोणिता सरित् स्यन्दति क्षितौ
लोहितं नभो बिम्बितं बभौ ॥१०॥

अर्घ्य-वारिणा किन्नु खे स्थितं
क्षालनाय तत् रक्तकल्मषम् ।
साधवो जलं स्वाञ्जलौ धृतं
प्रक्षिपन्ति त्रिःकृत्य व्योमनि ॥११॥

केशरी तदा सद्मनो बहिः
स्वेन कर्मणा व्यापृतः क्वचित् ।
मां कदा ततः सोऽभ्युपेष्यति-
चिन्तया नया साञ्जना स्थिता ॥१२॥

योषितां मनश्चञ्चलं पुन-
स्तत्र गोपितं नैव सुस्थिरम् ।
यद् दिवातनं वृत्तमद्भुतं
व्यक्तुमुत्सुका स्वामिनः पुरः ॥१३॥

सद्मनि स्थिता सा गवाक्षतः
खे व्यलोकयत् सुन्दरं नभः ।
आदिवं भ्रमन् श्रान्ततां गतः
सहचरश्मिकोऽहस्करो यतः ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रविरथ समवारुहत् प्रदोषे
पशुपतिमर्चयितुं सभक्ति किन्नु ।
करनिकरझरैरतः स शुभ्रैः
स्नपयति हैमनमद्रिलिङ्गमेवम् ॥१५॥

गुरुकुलबटवो नदीमुपेताः
सविधि विधाय समग्रसान्ध्यकृत्यम्
अथ च तत इमे निवर्त्तमाना
अनवरतं शिवमन्त्रमुच्चरन्तः ॥१६॥

धूम-लेखया राजितं वनम्
भस्म-रेखया भ्राजितं वपुः ।
कुण्ड-मध्यगं चेद्धमैन्धनम्
वह्नि-देवतां प्रार्थयद् बटुः ॥१७॥

भास्करं तदा पर्वतोन्मुखं
विश्रमाय तं यान्तमञ्जना ।
द्वौ करौ स्वकौ सम्पुटीकृतौ
सम्मुखं स्थिता प्रार्थनां जगौ ॥१८॥

बीजमुप्यते हालिकैः क्षितौ
प्राप्य ते कृपामङ्कुरायते ।
जायते यथा वर्धते क्रमात्
यौवनं लसत् कुड्मलायते ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जन्मनस्तथा पोषणस्य च
त्वं हि कारणं तल्लयस्य च ।
लोकबन्धवे कर्मसिद्धये
द्वादशात्मने भानवे नमः ॥२०॥

भास्कर ? क्व भोस्त्वं निलीयसे
मन्निकेतने स्वागतं तव ।
हे त्विषाम्पते क्षेपय क्षपां
प्रार्थये भव भ्रूणकान्तिदः ॥२१॥

प्राप्य काञ्चनं मेरुपर्वतं
सूर्यरश्मयः प्राविशन् गृहान् ।
प्राभवन् पुनर्दीपदेहिनो
मोदनाय ते गेहिनां मनः ॥२२॥

सान्ध्यसुन्दरी दीपिकानना
सद्ममध्यगा राजते यदा ।
सर्वसुन्दरं वेश्म शोभते
कन्दरोपमं जायतेऽन्यथा ॥२३॥

अञ्जनापतिः सायमागतो
यूथपाग्रणीः केशरी हरिः ।
अञ्चिताञ्जना सा स्मितानना
यद् दिवाऽभवत् तन्न्यवेदयत् ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतो ददौ यज्ञियं हविः
स्वीकृतं मयेत्येवमाह सा ।
केशरी तदा मन्मनोरथः
पूर्णताङ्गतश्चेत्यवोचत ॥२५॥

इत्थमञ्जना केशरि-प्रिया
भ्रूणमात्मनः स्नेहतोऽपुषत् ।
चेतसा शिवं संस्मरन्त्यगात्
गर्भिणी तदा गुर्विणी क्रमात् ॥२६॥

वायुरुद्रयोरंशधृक् यदा
भ्रूणकोऽभवत् मातृकुक्षिगः ।
हृष्टमानसा केशरिप्रिया
तत्प्रभावतो भासते स्म ह ॥२७॥

सेविकाः सदा सन्निधौ स्थिता-
स्ताः दिवानिशं सेवने रताः ।
तासु काप्ययादञ्जनापतिं
दोहदस्य या लक्षणं जगौ ॥२८॥

जातु साऽञ्जना नैकशोऽवमत्
नैव भोजनं स्वीचकार सा ।
खादति स्म सा कर्हि मृत्तिकां
जातु सौरभं जिघ्रति स्म ह ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

केशरी विदन् तामवस्थितिं
गुर्विणीं प्रियामेत्य तस्थिवान् ।
सम्प्रति प्रिये स्वास्थ्यजां स्थितिं
कीदृशं वदेत्येवमूचिवान् ॥३०॥

दैवतं त्वभूत् कुक्षिगं यतो
वान्तरूपतो देहकिल्विषम् ।
स्यन्दतीति ताः सेविका जनाः
सान्त्वनां ददुस्तत्र चाञ्जनाम् ॥३१॥

अञ्जनोदरे वर्ततेतरां
रुद्ररूप-धृक् भ्रूणकः किल ।
पार्थिवं वपुस्तस्य वर्धितुम्
किन्तु मृत्तिकामत्ति गुर्विणी ॥३२॥

स्वं मनोरथं प्राप्त-दोहदा
कीदृशं कदा संव्यनक्ति सा ।
सद्य एव तत् सन्निधीयताम्
केशरी सखीवर्गमूचिवान् ॥३३॥

चैत्र-मासि या शुक्लपक्षगा
पूर्णिमा तिथिर्मेषगो रविः ।
मङ्गलाऽभिधे भौम-वासरे
दोहद-व्यथामाप साऽञ्जना ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वैः सखीजनैः संवृताऽभितः
क्रन्दति स्म सा हा म्रिये ? म्रिये ? ।
तत्पद-द्वयं हस्त-युग्मकं
सान्त्वनां ददुः सन्निपीडच ते ॥३५॥

गुर्विणीषु या सूतिका-व्यथा
विश्रुता क्षितौ सातिदुःसहा
साम्यमेति वै नैव केनचित्
मातृ-गौरवं गीयते ततः ॥३६॥

अञ्जना यदाऽसूत तत्क्षणम्
दिव्यरूपिणं सूनुमद्भुतम् ।
खं बभौ तदा मारुतो ववौ
पार्श्वगो जनो मङ्गलं जगौ ॥३७॥

पुष्प-वर्षणं चक्रतुस्तदा
व्योमतोऽप्सरः किन्नरीगणः ।
हृष्ट-मानसा देवता जगुः
सर्वदा जयो मारुते तव ॥३८॥

राम-जन्मनो द्रष्टुमुत्सवम्
ये सुरास्तदाऽयोध्यकां गताः ।
अञ्जना-सुतं द्रष्टुमुत्सुका
मेरुपर्वतं ते समागताः ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अञ्जना यदाऽसूत पुत्रकम्
सेविकास्तदाऽरिष्ट-कक्षतः ।
सूचनाय ताः सत्वरं तदा
निर्भयं बहिर्द्वारि सङ्गताः ॥४०॥

केशरिन् ? हरे ? त्वं सदा जय
साऽञ्जना सुतं चाऽभ्यसूयत ।
इत्थमेव ता एत्य प्राब्रुवन्
वर्धतां यशो वर्ततां सुखम् ॥४१॥

केशरी तदा बन्धुभिर्वृतः
सेविका-जनैस्तैः सुसूचितः ।
कुण्डले तथा चाऽङ्गुलीयकम्
दत्तवान् मुदा कङ्कणादिकम् ॥४२॥

रुद्रं चैकादशममुमथो पुत्र-रूपेण लब्ध्वा
दृष्ट्वा दिव्यं तनय-वदनं साञ्जनातीव हृष्टा ।
जातं सद्यः प्रसव-जनितं भस्मसात् कष्टजातम्
रात्रिर्जाता विलयपथगा सम्बभौ सुप्रभातम् ॥४३॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये द्वितीयः सर्ग ईरितः ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तृतीय सर्गः

(उपजातिच्छन्दः)

दिशः प्रसन्ना विदिशः प्रसन्नाः
विभावरी चास्तमिता विषण्णा ।
व्रतत्यथो स्निह्यति वातजातम्
जातं जगत्यां शुभदं विभातम् ॥१॥

रागैः परागैर्विविधैर्मनोज्ञैः
फलप्रसूनाञ्चित-पादपोत्थैः ।
सुखावहा सा प्रकृतिस्तदानी-
मुदीरयन्ती किल सुप्रभातम् ॥२॥

ववुः शनैः शान्ततमाश्च वाता
बभुः शुभाः स्वच्छ-जल-प्रपाताः ।
जगुर्विहङ्गा ललितं तदानीम्
सभाजमाना नवसुप्रभातम् ॥३॥

वामाङ्गिनी वामत एव सुप्ता
वराननं कान्तिमयञ्च दृष्ट्वा ।
स्मेराननाऽऽरक्तमुखी सकामा
त्यक्तुं न शक्ता स्मरधाम रामा ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पति-प्रवासा चपलाधुनैव
प्रियान्तरेण क्षणदां व्यतीत्य ।
आलोहितास्याऽवनता ह्रियैवम्-
उषोमुखी सा प्रययौ स्वगेहम् ॥५॥

प्रियां त्वदीयां किल वारुणीं स
शशी रतेप्सुर्निभृतं निपीय
मुहुः समाश्लिष्य रतिं चकार
सेर्ष्या तु पूर्वा वरुणं चगाद ॥६॥

स्वैरेण पत्नीं विधिनोपभुक्तां
बुद्ध्वैव खिन्नो वरुणो बभूव ।
प्राचीं समाश्लिष्य तयैव रेमे
ज्ञात्वैव रक्तोप्यरुणो रुरोष ॥७॥

उषोमुखीं तां वरुणोपभुक्तां
तत्याज पूर्वामरुणोऽपि किं वा ।
उदीयमानं तु रविं विलोक्य
पूर्वा तमाश्रित्य बभावपूर्वा ॥८॥

किञ्चान्धकारेण विवृद्ध-वैरो
युयोध चन्द्रः प्रहर-त्रयं सः
श्रान्तो यदाभूदपरो युयुत्सु
र्युद्धाय सज्जोऽरुण एष किं नु ? ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्नानाभिलाषा बटवः समेत्य
जलाशयं तत्र भृशं वगाह्य ।
पूर्वां च सन्ध्यां सविधि श्रयन्ते
कामप्यपूर्वां स्थितिमाश्रयन्ते ॥१०॥

स्नानं समाप्याश्रम-सम्मुखीना
द्विजाश्च मन्त्राँस्तु यथा पठन्ति ।
श्रुत्वा तरुस्था द्विज-शावकाश्च
तानेव मन्त्रान् मुहुरभ्यसन्ति ॥११॥

माताञ्जना कुक्षि-गतं च सूनुं
मुदा बभौ कक्ष-गतं विलोक्य ।
स चाञ्जनाजानिरपि प्रसन्नः
कुटुम्बिनीं स्वां तनयञ्च वीक्ष्य ॥१२॥

पुत्रोत्सवेनेह समं सुखं न
दुःखन्त्वपुत्रेण समं क्षितौ न ।
कुपुत्रतः श्रेष्ठमपुत्रवत्वम्
जनः समीहेत सुतं सुगुण्यम् ॥१३॥

क्रोडीकरोति स्म सुतं तु माता
निधाय हस्त-द्वयके प्रसन्ना ।
विधाय तं स्कन्ध-गतं कदाचित्
स्वयं पिताभिभ्रमति स्म हर्म्यम् ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अथाञ्जना-जानिरभूत् स जातु
बहिः स्थितः कार्य-विशेषतस्तु ।
माता प्रसूनान्यथ चेतुकामा
ययौ करण्डं स्वकरे दधाना ॥१५॥

स चाञ्जनेयः प्ररुरोद तत्र
बुभुक्षया पीडित एव सद्यः ।
तल्पात् स्वकीयादवरुह्य भूमौ
तां मार्गयन् चङ्क्रमणं चकार ॥१६॥

अभूत् यदा प्राङ्गण-सम्मुखीनः
नवोदयं स द्युमणिं ददर्श ।
रक्तं फलं तं मधुरं सुपक्वम्
मत्वा बुभुक्षुर्गगनं ससर्प ॥१७॥

पोप्लूयमानं प्लवगं विलोक्य
तस्यानुगोऽभूत् पवनः प्रसह्य ।
स सूर्यलोकाभिमुखस्य तस्य
सुरक्षणार्थं प्रययास सद्यः ॥१८॥

अभूत् स एकादशरुद्र-रूपो
मनोजवो वायुसुतो बलिष्ठः ।
प्रस्थाय मार्गेण विहायसैवम्
प्राप्तः स सद्यस्तपनस्य लोकम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरः समायान्तमहस्करं स
तमाञ्जनेयं प्लवगं ददर्श ।
रुद्रांशभाजं पवनात्मजं च
बुध्वा पुनःप्रीतमना जहर्ष ॥२०॥

अयं शिशुर्वै पवनस्य चैवं
शिवस्य पुत्रो मम लोकमद्य ।
समागतश्चेति रविः प्रसन्नः
सह्यान् स्वकीयान् किरणाँश्चकार ॥२१॥

स मारुर्तिनिर्भयमेत्य तत्र
सूर्यस्य तत्स्यन्दनमारुरोह ।
चिखेलतुर्द्वावरुणः कपिश्च
मिथो मुदा तौ श्वसनो ददर्श ॥२२॥

परोपकारी गुणवाञ्जनो यः
स देशकालावनुसृत्य लोके ।
बालेन बालोऽथ युवेव यूना
वृद्धेन चास्ते सह तद्वदेव ॥२३॥

स्वर्भानुरेवं प्रबभूव तत्र
भानुं क्षुधार्तो ग्रसितुं तदैव ।
दिष्टया तिथिस्तद्दिवसे त्वमाऽभूत्
रविर्यतः क्षीण-करस्तदाभूत् ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राहुं तदा मारुतिरेष दृष्ट्वा
दृढं च जग्राह ममर्द मुष्ट्या ।
भीतश्च मा मेति वदन् स राहु-
श्चक्रन्द पीडामनुभूय साऽश्रु ॥२५॥

निजं कथञ्च प्रविमुच्य तस्मात्
पलायितो द्रागमरावतीं सः ।
प्रदर्शयन् स्वां वपुषो ह्यवस्थाम्
रोषान्वितो वृत्रहणं जगाद- ॥२६॥

मम क्षुधाया विनिवारणाय
निर्दिष्टपूर्वौ किल पुष्पवन्तौ ।
निरर्थमन्यो भवतैतदर्थम्
कपिर्नियुक्तः सहसा किमर्थम् ॥२७॥

दर्शस्य पर्वेति गतोऽहमद्य
बबन्ध पुच्छेन स मां निपीड्य ।
ततः स्वमुन्मुच्य समागतोऽस्मि
खादामि कं चातिबुभुक्षितोऽस्मि ॥२८॥

श्रुत्वा वचो राहु-मुखात् शचीशः
किमद्भुतं चेति विचिन्तयन् सः ।
आहूय तं हस्तिपकं स्वकीयम्
सद्यः स्तदैरावतमारुरोह ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कस्तत्र सूर्यस्य समीपमस्ति
यः सैंहिकेयं क्षुधितं रुणद्धि ।
ततो मरुत्वानथ सूर्यलोकम्
गतः प्लवङ्गेन सहैव योद्धुम् ॥३०॥

प्रागात् पुरस्तस्य तु सैंहिकेयः
तमप्यधावत् पुनराञ्जनेयः ।
पुनः समायात इति क्रुधा स
मुष्टिं समुद्यम्य भृशं जगर्ज ॥३१॥

इन्द्रस्तदा रक्षितुमेत्य राहु-
मुत्थाप्य वज्रं निपपात तस्मिन् ।
हनुव्रणोऽसौ कुलिशाहतश्च
क्रन्दन् कपिर्वेदनया रुरोद ॥३२॥

इन्द्रायुधेन प्रहृतं स्वसूनुम्
दृष्ट्वैव जातः पवनो विषण्णः ।
स मूर्च्छितञ्चात्मजमाददानो
गुहां प्रविष्टस्तरसा विपन्नः ॥३३॥

रुष्टो मरुत् स्वां पकृतिं निरुध्य
दृढं स्थितस्तेन गतिर्निरुद्धा ।
जगत्समस्तं त्वजगत्प्रदृष्टम्
लोकोऽन्वभूत् प्राणवियोगकष्टम् ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बाला न खेलन्त्यथ चत्वरेषु
गोष्ठेषु वत्साश्च न वोत्प्लवन्ते ।
न घूर्णयन्ति भ्रमराः सुमेषु
न शाद्वले तत्र मृगा रमन्ते ॥३५॥

पृथ्वी स्थिराः स्थावरजङ्गमाश्च
वनस्पतिः कीटभुजङ्गमाश्च
निःश्वासकष्टान्यनुभूय सर्वे
स्थितास्त्रिलोकं प्रलयोन्मुखं नु ॥३६॥

न सागरे वीचय उच्छलन्ति
न निर्झरिण्यश्च जलं वहन्ति ।
न खे पुनः पक्षिण उड्डयन्ते
लताश्च वृक्षान् न समाश्लिषन्ति ॥३७॥

लोकं समग्रं जडवद् विलोक्य
दिग्भ्यो दशभ्यस्त्रिदशा उपेत्य
ब्रह्माणमादाय मिथो विमृश्य
समाहिता यत्र मरुद् गुहास्थः ॥३८॥

विधिः कपेः सन्निकटं जगाम
स्वाङ्के स वायोः सुतमादधानः ।
व्यमूर्च्छयत् तं श्रुतिमन्त्रमुक्त्वा
हृष्टः समीरश्च बभूव दृष्ट्वा ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कपिः समुत्थाय सुरान् ननाम
सद्योऽथ वायुः स्वगतिं ततान ।
प्रणम्य देवाँश्च विरिञ्चिमुख्यान्
विनम्रतापूर्वकमूचिवान् सः ॥४०॥

पुत्रो यथा मे गुणवाँश्च धीमान्
बली श्रमी कारुणिकोऽथ विद्वान् ।
लोकस्य कल्याणकरो यथा स्यात्
युष्माकमस्योपरि सा कृपा स्यात् ॥४१॥

आकर्ण्य देवाः पवनोक्तमेवं
वरं प्लवङ्गाय ददुस्तदैवम् ।
धातावदत् बालक एष ब्रह्म-
शापाद् विमुक्तश्च भविष्यतीति ॥४२॥

अम्लान-मालां प्रददौ मनोज्ञां
ख्यातो हनूमानिति वै त्रिलोक्याम्
वपुश्च मद्-वज्रसमं लभेता-
मेवं तमूचे प्लवगं मरुत्वान् ॥४३॥

जगाद भास्वानपि सर्व-विद्या
अस्मै प्रदास्याम्यथ शब्द-मुख्याः ।
तथैव दास्यामि पुनः शतांशम्
स्वतेजसः स्यादिति कान्ति-कान्तम् ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समूचिवान् हृष्टतरः स पाशी
मत्पाशतोऽपाशित एष भूयात् ।
जलान्न बिभ्येदथ सागरेषु
सरिद्-ह्रदेष्वप्यकुतोभयः स्यात् ॥४५॥

यमोऽब्रवीत् वायुसुतः सदैव
नीरोगतां मत्कृपया लभेत ।
दण्डाददण्ड्यश्च भवेन्मदीयात्
शुभाशिषः सन्त्वमरत्वमीयात्। ॥४६॥

प्रादात् गदां यक्षपतिः कुबेरः
भूयात् सदैवैष शिशुः सुबेरः ।
स राक्षसान् यक्षगणाँश्च जीयात्
लोके न कस्मादपि सो बिभीयात् ॥४७॥

जगाद शम्भुश्च शिशुः सदैव
भवेदवध्यो मम चायुधैश्च ।
रिपुर्यदि स्यादथ सम्मुखीनः
बलेन बुद्ध्यापि भवेद् विहीनः ॥४८॥

राहुः सलज्जश्च तदाजगाम
क्षमस्व मां तत्र वदन् ननाम ।
यः संस्मरेत् त्वां हि सभक्ति लोकः
मज्जन्य-कष्टस्य भवेत् विमोकः ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रसाद्य देवाश्च वरैरमोघै
        र्जग्मुः स्वधामान्यथ वायुपुत्रम् ।
क्रोडे समुत्त्थाप्य शिशुं मरुत् च
        सुमेरुमद्रिं प्रययौ ततश्च ॥५०॥

अथ च पवन-सूनुर्भाग्यवान् देवताभ्यो
        विविध-वरमवाप्य प्रस्थितोऽभूद् गृहाय ।
विदित इह पृथिव्यां ख्यातनामा हनूमान्
        इति सपदि स जातो दर्प-दृप्तो वपुष्मान् ॥५१॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये तृतीयः सर्ग ईरितः ॥५२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्थः सर्गः

एकतः प्रकृति–चञ्चलः कपि :
सोंऽशतः प्रलयकृत्सुतः कपिः ।
मारुतस्य तनयस्त्वसौ कपि–
र्लालितः सुरवरैरभूत् कपिः ॥१॥

क्रीडति स्म सततं सुहृज्जनैः
पुप्लुवे स सरितश्च लीलया ।
कूर्दते स्म सखिभिर्द्रुमाद् द्रुमम्
वानरोऽथ च नरः स्वमायया ॥२॥

दैवतैरथवरैः सुपालितः
हर्म्यकेऽप्यतिशयं स लालितः ।
अभ्रमत् भुवि सदाऽकुतोभयः
स्वेच्छया व्यवहरन् निरङ्कुशः ॥३॥

किं करोम्यथ पुनः क्व यामि नु □
त्रोटयाम्यथ सुयोजयामि नु □
पातयाम्युत च घातयामि नु □
चिन्तयन्नहरहः स्थितः किमु□ ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वीपिवद् विटपिनां विपाटकः
केशरीव करिदर्पनाशकः ।
भल्लुवत् स विचचार काननं
क्रीडति स्म सह तैश्चसन्ततम् ॥५॥

सोऽखिलानि गिरि-गह्वराणि च
प्राविशत् सपदि चागमद् बहिः ।
अभ्रमच्च रिपुपक्षभीतिदो
निर्भयं स परितो गदा-ग्रही ॥६॥

काञ्चनीं तु कमनीयतां दधौ
कुण्डले परिदधद् भृशं बभौ ।
कच्छ-वस्त्रमधिकच्छमप्यसौ
बिभ्रदेव रमते स्म स क्षितौ ॥७॥

दैवतं वरमवाप्य मारुति-
र्दृश्यते स्म बलवत्तरो भुवि ।
आश्रमेषु गृहगोष्ठकेषु च
त्रासदं प्रकुरुते स्म चापलम् ॥८॥

कस्यचित् स तु कमण्डलूं क्षिपन्
प्राकरोद् दृषदि तत्र धूलिसात् ।
ध्यानमाकलयतो मुनेरथ
पञ्च-पात्र-परिवर्तनं व्यधात् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कस्यचित् तु मृग-चर्मणा स्वकम्
वेष्टयन् वपुरथ प्रतस्थिवान् ।
स्कन्धयोश्च विनिधाय कम्बलम्
दूरमेत्य स तरौ ररक्षिवान् ॥१०॥

अर्हणाय गृहिणा सुसज्जितम्
माल्य-पुष्प-जल-चन्दनादिकम्
जातुचित् स परितो विकीर्य तत्
भक्षति स्म फल-कन्द-मूलकम् ॥११॥

प्राविशत् स गृहिणां गृहाँस्तदा
शिक्य-बद्धमथ तैः सुरक्षितम् ।
भुक्तवान् दधि घृतं यथारुचि
स्फोटितञ्च गदयैव भाजनम् ॥१२॥

गोष्ठमेत्य तु गवां स मारुति-
स्तर्णकं किल मुमोच कीलितम् ।
दाम तस्य विनिधाय गोपितम्
तेन साकमकरोत् प्रकूर्दनम् ॥१३॥

तर्णकन्त्वसमये विमुच्य तं
चानयन् सपदि धेनु-सम्मुखम् ।
तावुभावपिबतां पयोमृतं
गोपका ददृशिरे सविस्मयम् ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दैवतं वरमवाप्य शक्तिमान्
जातु मारुतिरभून्महावपुः ।
सद्य एव परिवर्त्य तत्तनु-
र्दुर्निरीक्ष्य इव सोऽभवल्लघुः ॥१५॥

स्वेच्छया विचरति स्म भूतले
मारुतिः स्ववपुषाऽद्रिसन्निभः ।
नैव कोऽपि बलवत्तमो भुवि
यक्ष-राक्षस-नरेष्वदृश्यत ॥१६॥

यत्र काननमभूत् पुरा किल
तद् बभूव वसतिर्नृणामथ ।
यत्र वै नृ-वसतिस्त्वभूत् पुरा
सा तु काननमयी ह्यदृश्यत ॥१७॥

यत्र मन्दिरमभूत् पुरातनम्
स व्यधात् क़िल च तत्र मन्दुराम् ।
मन्दुरा तु भवति स्म या पुरा
स न्यधात् सपदि तत्र मन्दिरम् ॥१८॥

यत्र च स्थलमभूत् जलीकृतम्
यत्र वै जलमभूत् स्थलीकृतम् ।
साक्षरेति यदि ल़िख्यतेऽन्यथा
राक्षसेति किल पठ्यते यथा ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ह्यस्तनेऽहनि यथा व्यलोक्यत
श्वस्तनेऽहनि पृथक् व्यदृश्यत ।
यच्च यत्र विधिना कृतं यथा
सर्वमेव विहितं तदन्यथा ॥२०॥

सङ्गतास्तु प्रतिवेशिनस्तदा
ह्यञ्जनापति-गृहं समे गताः ।
सादरं प्रणति-पूर्वकं तत-
स्तेऽखिलं निजगदुस्त्विदं वचः – ॥२१॥

अन्तिमे वयसि वां सुतोऽभवत्
पार्वतीश-भगवत्प्रसादतः ।
बालको निखिल-शक्तिमानपि
दृश्यतेऽत्र जनसौख्यघातकः ॥२२॥

नास्त्यधीतिरत एष दुर्मतिः
शिक्षणेन नितरां भवेत् सुधीः ।
अन्यथा चरति वां सुतो यथा
वर्धते कुल-कुटुम्बिनां व्यथा ॥२३॥

इत्युदीर्य प्रतिवेशिनो गताः
केशरी समभवद् विचिन्तितः ।
अञ्जना नयनयोः कृताऽञ्जना
कष्टमाप कलिताऽश्रु-मोचना ।२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तौ गतावृषिकुलं तदैव हि
मारुतिस्त्वनुसरँश्च तौ ययौ ।
प्रापुरेवमुटजं गुरोर्यदा
दम्पती सविनयं प्रणेमतुः ॥२५॥

पुत्र एष हनुमानहर्निशं
सद्मनि प्रकुरुतेऽतिचापलम् ।
कोऽप्युपाय इह भो विधीयताम्
चापलं प्रकृतिजं प्रहीयताम् ॥२६॥

लोचने त्वथ निमीलयन् मुनि-
र्बालकस्य नियतिं व्यचिन्तयत् ।
सोऽवगत्य तपसः प्रभावतः
कारणं च विशदं न्यबोधयत् ॥२७॥

शक्तिरस्त्यतिशया सुतेऽधुना
ह्युद्धतो भवति तेन हेतुना ।
विस्मरिष्यति बलन्त्वतः परं
स्मारितः किल पुनः स्मरिष्यति ॥२८॥

स्नेहतः स च मुनिः पुनः स्वकौ
न्यस्तवान् शिरसि मारुतेः करौ
श्रौतमन्त्रमपठत् कमप्यथ
प्रोक्तवाँश्च विनयी गुणी भव ! ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालकः सकल-पालको भवे-
दर्भकः सुजन-वर्धको भवेत् ।
अञ्जने ! तव सुतो हि दुःखिना-
मार्त्तिनाशन-परायणो भवेत् ॥३०॥

अञ्जना पति-सुताऽन्वितस्ततः
स्वं गृहं प्रति समाययावथ ।
विस्मरन् स च कपिःस्वचापलम्
सम्बभूव गुण-गौरवास्पदम् ॥३१॥

पूजनाय यदि याति मन्दिरम्
साऽञ्जना सह सुतेन गच्छति ।
यावदेव न समाप्यतेऽर्हणा
निश्चलो वसति वै कृताञ्जलिः ॥३२॥

मारुतिस्तु सुजनप्रियोऽधुना
ज्ञातुमिच्छुरखिलं तु सोन्मनाः ।
अदभुतं किमपि पश्यति द्रुतं
पृच्छति स्वजननीं सविस्मयम् ॥३३॥

आचरन् स गुरु-पाद-वन्दनं
स्तौति सूर्यमथ केशवं शिवम् ।
मारुतिर्न कलहायतेऽधुना
शिक्षणं प्रकुरुते सदाञ्जना ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रातरेव स गृहीत-पट्टिकः
        लेखनाय कठिनीं करे धृतः ।
वर्तुलं विपुलमक्षरं सदा
        सुन्दरं लिखति सश्रमं मुदा ॥३५॥

अञ्जना स्व-तनयं पुरःस्थितम्
        पाठयत्यथ च यत्नतोऽनिशम् ।
अच्-स्वरान् अ-इ-उ-ऋ-लृकादिकान्
        सस्वरं क-च-ट-तादिवर्गकान् ॥३६॥

पद्य-लक्षणमनुष्टुभादिकं
        नाम-धातु-पद-रूप-संहतिम् ।
अङ्करूपमपि चानवं समं
        सोऽभ्यसन् प्रतिभयाथ दीव्यति ॥३७॥

सज्जनो विहित-भोजनो निशि
        संस्थितश्च किल मातृ-सन्निधौ ।
ज्ञातवान् स नितरां शुभां कथाम्
        भक्ति-नीति-विषयां सुखावहाम् ॥३८॥

एधते भुवि यवाङ्कुरो यथा
        वर्धते निशि कलानिधिर्यथा ।
अञ्जनातनय एषकोऽर्भकः
        प्राप प्रत्यहमहो नवं वयः ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टमे हि तनयस्य हायने
ब्रह्मचर्य-नियम-प्रशिक्षणम् ।
देयमित्यथ विचार्य केशरी
प्रैषयत् स्वतनयं गुरोःकुलम् ॥४०॥

अक्ष-माल्य-सितभस्म-शोभितः
पीत-वस्त्र-युगलेन सज्जितः ।
दृश्यते विधृत-यज्ञ-सूत्रको
वेद-मन्त्र-पठने समुद्यतः ॥४१॥

मारुतस्य सुत एष मारुतिः
शङ्करांऽश अत एव शाङ्करः ।
आञ्जनेय स यतोऽञ्जनासुतः
गीयतेऽष महिमा हनूमतः ॥४२॥

लाति काननगतान् कुशानतः
ख्यायते स कुशलेति कर्मठः ।
सूक्ष्म-दृष्टिरपि तस्य चाऽभवत्
कीर्त्यते स्म स कुशाग्रबुद्धिकः ॥४३॥

सन्तु नाम बहवोऽत्र सद्मनि
सङ्गताश्च बटवः स्व-कर्मणि ।
तेष्वयं पटुतमोऽञ्जनासुतः
सूर्यवद् ग्रह-गणे बभौ स्थितः ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतिर्गुरु-गृहे स्थितो यदा
वेदशास्त्रमथ तत्र चाऽभ्यसत् ।
ध्यान-योग-नियमाँश्च पालयन्
ब्रह्मवर्चस-युतस्तदाऽभवत् ॥४५॥

मातरं गदितवान् मनोगतम्
मारुतिः प्रणति-पूर्वमेकदा ।
आश्रमे पठितवाँस्तथापि मे
वर्धतेऽध्ययनकामना सदा ॥४६॥

किं करोमि नु ! वदाऽम्ब ! यामि कम् !
कुत्र कः प्रशमयेन्मम क्षुधाम् ।
प्रश्नजातमिह मानसोद्भवम्
प्राप्तुमिच्छति हि तस्य सूत्तरम् ॥४७॥

प्राह सा स्मरसि किं पुरा सुत !
त्वं क्षुधाऽर्दितमनास्तदाऽभवः ।
सूर्य-बिम्बमपि रक्तिमं फलम्
डीयसे स्म च विभाव्य तत्क्षणम् ॥४८॥

त्वां तदा दिनकरः समूचिवान्
पाठयाम्यथ भविष्यसि प्रधीः ।
भास्वता निगदितं वचः स्मर
प्रेहि लोकमधुना रवेरितः ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

क्षालयस्व मनसस्तमोऽखिलम्
संशयं हृदि भवं निवारय।
तं प्रसाद्य समधीष्व वत्स ! मे
मङ्गलाय गमनं सदाऽस्तु ते ॥५०॥

स्मारितः कपि-सुतः समुत्त्थितो
विस्मृतञ्च निखिलं स्मरँस्ततः।
स प्रणम्य पितरौ प्रतस्थिवान्
दृश्यते स्म वपुषा स कान्तिमान् ॥५१॥

ऊर्ध्व-दृक् कर-पलाश-दण्डधृत्
मुञ्ज-निर्मित-सुयज्ञ-सूत्र-भृत्।
शोभनोऽथ मृग-चर्म-मण्डनः
पुप्लुवे वियति वायु-नन्दनः ॥५२॥

रश्मिमालिनमुपेत्य मारुतिः
स्यन्दनाभिमुखमेव तस्थिवान्।
तं प्रणम्य विनयेन भास्करं
हृद्गतं निखलभावमूचिवान् ॥५३॥

भास्वता स बहुशः परीक्षितो
बोध्य एष इति तत्र निश्चितः।
संशयश्च सकलो मनोगत-
स्तस्य सन्तमसवद् व्यपाकृतः ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाङ्मयं समधिगम्य सश्रमम्
शब्दशास्त्र-विषयेषु कोविदम् ।
आश्रवं विविध-वाग्-विशारदम्
तं कपिं रविरुवाच दीक्षितम् ॥५५॥

अथरविरवदन् निरीक्ष्य शिष्यम्
मुदितमनाः स्वगृहं प्रयाहि तत्र ।
अवधपुरि तवाग्रजोऽस्ति रामो
कुरु कृत्यं तमुपेत्य तस्य वत्स ॥५६॥

कपिर्हिमाद्रिमेति रश्मिमालिना प्रचोदितः
कदा नु राममेम्यहं विचिन्तयन् स नित्यशः ।
विनीत-भाव-भावितं रवेरधीत-विद्यकम्
विलोक्य वानरा नरास्तदाऽभवन् मुदाऽन्विताः ॥५७॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः
हनूमदयने काव्ये चतुर्थः सर्ग ईरितः ॥५८॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चमः सर्गः

(मालिनीच्छन्दः)

तत्राचार्याद् भास्वतोऽधीत-शास्त्रो
लब्धानुज्ञो ज्ञान-विज्ञान-वित्तः ।
दीपात् दीप्तो दीपवत् सुप्रदीप्तो
नूनं सूर्योऽयं द्वितीयोऽद्वितीयः ॥१॥

कीर्त्या शुभ्रं गीष्पतिं चापरं तं
धीरं वीरं भ्राजमानं प्लवङ्गम् ।
प्रत्यायान्तं सूर्यलोकात् स्वसूनुम्
सद्यो दूरात् केशरी सन्ददर्श ॥२॥

ज्ञात्वा पुत्रं प्राङ्गणस्थं गृहान्तः
स्थित्वा कार्यं कुर्वती चाञ्जना सा ।
आगत्यैवं कान्ति-कान्तं बहिश्च
दर्शं दर्शं तं प्रसन्ना बभूव ॥३॥

श्रद्धाशीलः सूर्यशिष्यो हनूमान्
तौ साष्टाङ्गं भक्ति-युक्तो ननाम ।
यद् यद् जातं सूर्यलोके समस्तम्
वृत्तं प्रोचे तत्र विद्वल्ललामः ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दृष्टासक्तिः शास्त्रमात्रे तदीया
रामे रागोऽन्यत्र दृष्टो विरागः ।
निष्ठा चैवं प्राणिनामर्त्ति-नाशे
प्रज्ञाचुञ्चुश्चर्चितोऽभूत् समाजे ॥५॥

गेहे स्थित्वा कानिचित् तान्यहानि
तं साकेतं सोऽभवद् गन्तुकामः ।
आदित्येन प्रेरितस्तत्र यातुम्
स्थातुं नान्यत्र क्षमः सोऽत्यधीरः ॥६॥

पुत्रोऽयोध्यां यास्यतीत्यञ्जना सा
चिन्ता-मग्नाहर्निशं खेदयुक्ता ।
म्लाना माता चान्तिकं तस्य गत्वा
पप्रच्छैवं कीदृशी ते ह्यवस्था ॥७॥

धन्यः सूर्यो मद्-गुरुर्यत् सकाशा-
दाप्ता विद्या ज्ञान-विज्ञानरूपा ।
तेनादिष्टं रामसाहाय्यकृत्यं
पूर्त्यै मातर्गन्तुकामोऽस्म्ययोध्याम् ॥८॥

सूनोर्भावं हृद्गतं तं निशम्य
सद्यश्चिन्ताव्याकुला सा बभूव ।
नीतिं दृष्टान्तेन युक्तं प्रदर्श्य
वाक्यं भूयः स्नेहसिक्तं जगाद- ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अस्मत्पुत्रो लोकमान्यः क्रियावान्
प्राज्ञोऽभिज्ञोऽसौ गुणज्ञः प्रधीमान् ।
एकां पाणौ कृत्य कन्यां कुलीनाम्
वंश्यं कृत्यं पूरयन् स्थास्यतीति ॥१०॥

एवं नित्यं चिन्तयन्ती स्थितास्मि
देवस्याहं प्रार्थनायां रतास्मि ।
त्यक्त्वा गेहं यास्यसीत्येवमद्य
श्रुत्वात्यन्तं खेदखिन्नाऽस्मि भूयः ॥११॥

वृद्धावस्थां प्राप्तवन्तावभूताम्
पश्याऽऽवां त्वं दुःखदां नाववस्थाम् ।
यात्रा-मार्गस्त्वावयोः कष्टदोऽस्ति
सूनो मैवं निस्सहायौ विदध्याः ॥१२॥

माता तस्याप्यश्रुनेत्रा रुरोद
खिन्नश्चैवं केशरी सम्बभूव ।
ऊचे त्वं मा याहि याहीति याहि
वार्धक्ये नौ पाहि पाहीति पाहि ॥१३॥

सूनुः प्रोचे सद्गुरुः सूर्यदेवः
स्तस्याऽनुज्ञा सर्वथा पालनीया ।
मामम्ब ! त्वं गन्तुकामं न रुन्धि
स्वाचार्याज्ञा नैव हेयेति विद्धि ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मातः ! कार्याहर्निशं लोकसेवा
सेवाधर्मः श्रेष्ठधर्मः सुगीतः ।
दुष्टान् हत्वा भूव्यथां च प्रणाश्य
प्रत्यायास्याम्यम्ब ? कृत्यं समाप्य ॥१५॥

साक्षाद् विष्णू रामरूपेण चेह
मर्त्ये लोके योऽवतीर्णः सदेहम् ।
लक्ष्मीरूपा जानकी चैवमेव
जाता मातर्मैथिली भूमि-शस्ता ॥१६॥

मातर्जम्बू-द्वीपमेतत् समस्तं
त्रस्तं नित्यं यातुधानै र्विगीतैः ।
दीनान् वृद्वान् धार्मिकानास्तिकाँश्च
दुष्टाश्चैवं नास्तिकाः पीडयन्ति ॥१७॥

मातस्तेषां निग्रहाऽर्थं खलानाम्
साहाय्याऽर्थं राघवस्याऽपि तत्र ।
आज्ञप्तोऽहं भास्वता पूर्वमेव
सायोध्या मे शीघ्रगम्यास्ति मातः ! ॥१८॥

जातोऽहं ते कुक्षितश्चेह दिष्ट्या
धन्यं मन्ये भाग्यमेतन्मदीयम् ।
सेवार्थं मे जीवनं स्यात् जनानाम्
साकेतं तत् यामि मे देह्यनुज्ञाम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नारीमात्रं मातृरूपं मदर्थं
सर्वो मर्त्यः पितृरूपो मदीयः ।
मातः ! सर्वा स्वसृरूपाः कुमार्यः
कन्यां पाणौकृत्य कामानयानि ! ॥२०॥

तावत् कष्टं प्राप्य मातः ! प्रसूय
सर्वा इच्छाः स्वा मदर्थं विलीय ।
अध्याप्येवं ज्ञान-विज्ञानतत्त्वं
माया-रज्वा बद्धुकामा किमर्थम् ! ॥२१॥

शाकं तैलं तण्डुलं वेसवारः
शाटीं चोलं कञ्चुकं स्वर्ण-हारः ।
आशा-पाशैर्लौकिकैः पाशयित्वा
को लाभः स्वं चेतसं क्लेशयित्वा ॥२२॥

ईशावास्यं विश्वमेतत् समस्तम्
मायामात्रं यत् त्वदीयं मदीयम् ।
सर्वं सौख्यं त्याग-भावेन भोग्यम्
नो चेद् भूयः कष्टमेवास्ति लभ्यम् ॥२३॥

ऊर्ध्वं नीचैरग्रतः पृष्ठतश्च
व्याप्तश्चात्मा वर्ततेऽन्तर्बहिश्च ।
माया-शक्त्या मोहिता विभ्रमामो
मातस्तथ्यं गूढतत्त्वं न विद्मः ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पूर्वं शम्भोर्यत्तपस्त्वं चकर्थ
तस्यैवांशः पुत्ररूपोऽहमद्य ।
दिव्या दृष्टिर्गृह्यतां मातरेषा
विश्वात्मानं त्वत्पुरो दर्शयामि ॥२५॥

उक्त्वा चैवं मारुतिर्भीमरूप-
श्चैकः सद्यो नैकरूपो बभूव ।
माता चैषा विस्मयाविष्टचित्ता
तद् ब्रह्माण्डं दिव्यमित्थं ददर्श ॥२६॥

विश्वे देवा ब्रह्मविष्णू शिवश्च
सर्वे लोकाश्चन्द्रसूर्यौ यमश्च ॥२७॥
अभ्रं पृथ्वी सागराः पर्वताश्च
नद्यो भिद्यः स्थावरा जङ्गमाश्च ॥

दृष्ट्वा सूनुं विश्वरूपं तमेवं
जाता माता पूर्णकामा तदैव ।
स्वीयौ द्वावप्येव हस्तौ प्रसार्य
भूयो वाणीं साञ्जना सूनुमाह ॥२८॥

सामान्यस्त्वं नैव पुत्रो मदीयः
शम्भुः साक्षादेव लब्धावतारः
दिष्ट्या जाता धन्य-धन्याऽहमद्य
सर्वाकाङ्क्षाः पूरिता मे त्वयैव ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हे पुत्र ! त्वं स्वाऽनुकूलं कुरुष्व
स्वं चोद्देश्यं जन्मनः पूरयस्व ।
नैवावां ते विघ्नरूपौ भवावो
दीर्घायुः स्यादाशिषा वर्धयावः ॥३०॥

पुत्रं चैवं साञ्जना सम्बभाषे
सद्यो दिव्य-ज्योतिषा सम्बभासे ।
तस्याश्चान्तःकिल्विषं चाऽपि नष्टम्
नूत्नो भावश्चोदितश्चित्तमध्ये ॥३१॥

तिष्ठाम्येवं तत्र रामेण सार्धं
साहाय्यार्थं च प्रयस्यामि नित्यम् ।
दृष्टो लोकः कष्टजातेन चार्त-
तञ्चोद्धार्याहं भवेयं कृतार्थः ॥३२॥

आजन्माऽहं ब्रह्मचर्यं दधामि
तत् कौपीनं मुद्गरं धारयामि ।
सौख्यं मातः ! नश्वरं सन्त्यजामि
नित्यं पूर्णं चित्सुखं तद् भजामि ॥३३॥

मार्गे दृष्टानन्तरायानपास्य
चित्तं दूष्यद् वैकृतं तद् विनाश्य ।
दृष्टिं स्वीयां लक्ष्यमात्रे निधाय
यास्याम्याज्ञां मद्गुरोः पूरणाय ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नैकं शास्त्रं नैकशस्तस्य चार्था
नैको मार्गो नेकशश्चाध्वनीना: ।
सेवा-धर्म: केवलो मूल-धर्मो
धर्माभासस्त्याज्य इत्येव मर्म ॥३५॥

पुत्रप्रोक्तै: सुन्दरै: सद्वचोभि:
पित्रोश्चिन्ता तत्क्षणादेव शान्ता ।
पुत्रोऽयोध्यां गन्तुमेवं प्रतस्थे
जाता म्लाना साञ्जनालिन्दमध्ये ॥३६॥

व्योम्ना मार्गेणाथ मेरोश्च हैमात्
ध्यायं ध्यायं कौशलेयं तदागात् ।
भक्त्या नित्यं प्रब्रुवन् रामनाम
दृष्टं दूरादेव साकेतधाम ॥३७॥

शीतं नीरं पातुकाम: स नद्या:
प्राप्तस्तीरं चाञ्जनेय: सरय्वा: ।
धृत्वा ह्रस्वं वानरीयं स्वरूपं
तिष्ठन् कञ्चित् दृष्टवान् योगि-वेषम् ॥३८॥

तिस्रो रेखा भस्मनो यस्य भाले
संशोभेते कर्णयो: कुण्डले द्वे ।
वक्षस्येवं चाऽक्ष-माल्योपवीते
साक्षात् शम्भुर्दृश्यते जूटकेन ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सोऽयं देवो धूर्जटिर्योगि-वेषो
मर्त्याकारं राघवं द्रष्टुकामः ।
हैमाद्द्रेः प्राप्तवान् पुण्य-धाम
गायं गायं चेतसा राम-नाम ॥४०॥

योगिन् ! कस्त्वं कुत्र ते वास-भूमिः
कस्माद्धेतोरत्र साकेत-भूमिम् ।
आयातो मे ज्ञातुमिच्छा प्रवृद्धा
त्वामाकृत्या शम्भुवत् चेह दृष्ट्वा ॥४१॥

एवं श्रुत्वा मारुति-प्रोक्तवाचं
स्नेहाऽऽविष्टो योगिराजो जगाद ।
देशाद् देशं यामि भिक्षाटनाय
भ्रामं भ्रामं प्राप्तवानत्र तात ! ॥४२॥

त्वां दृष्ट्वाऽहं मोदमानोऽस्मि भूयः
को वा हेतुर्नैव जानाम्यथाऽपि ।
वात्सल्येन प्रीतिमानस्मि किञ्च
सत्यं ब्रूहि त्वं कुतः प्रस्थितोऽसि ॥४३॥

श्रुत्वा वाचं योगिनोक्तं तु हृद्यम्
सद्यो जातं मानसं सुप्रसन्नम् ।
गत्वा किञ्चित् सन्निधिं तस्य भूयः
नम्रो भूत्वा मारुतिस्तं जगाद ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योगिन् ! मेरौ पर्वते मे निवासः
रामं द्रष्टुं वर्तते सत्प्रयासः ।
तत्रैवाऽऽस्ते वत्सलाऽम्बा मदीया
लोके नाम्ना साऽञ्जनेति प्रसिद्धा ॥४५॥

लब्धं सूर्याज्ज्ञान-विज्ञानतत्त्वं
जानीहि त्वं येन मामाऽञ्जनेयम् ।
उद्देश्यं मे वर्तते राम-सेवा
योगिन्नस्मात् कारणादागतोऽस्मि ॥४६॥

श्रुत्वा-चैतत् धूर्जटिर्योगि-रूपो
ज्ञात्वा कीशञ्चांशरूपं स्वकीयम् ।
कक्षे कृत्वा तं व्यमर्शीत् कराभ्यां
दर्शं दर्शं साऽश्रु-पूर्णेक्षणाभ्याम् ॥४७॥

एकः शम्भुः शाम्भवोऽसौ द्वितीयः
एकः पुत्रस्तत्पिताऽन्यो द्वितीयः ।
जानीतो द्वौ तत्र नान्यस्तृतीयः
चक्राते तौ वाचमेवाऽन्तरीयाम् ॥४८॥

एको हेमाद्रेर्द्वितीयो हिमाद्रे-
रागत्यैवं संस्थितावत्र दिष्ट्या ।
तुल्योद्देश्यौ राघवं द्रष्टुकामौ
श्रद्धावन्तौ दिव्य-साकेत-भूमौ ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्कन्धे कृत्वा वानरं चेन्द्र-जालम्
जानन् योगी वेद सर्वं त्रिकालम् ।
हस्तौ पश्यन् राजमार्गे जनानां
राज्ञो हर्म्यं प्राप्तवान् पर्यटन् स ॥५०॥

योगी तस्मात् गोपुरात् संप्रविष्टः
प्रासादस्य प्राङ्गणं चातिहृष्टः ।
योगीन्द्रं तं राघवं द्रष्टुकामः
खेलां रम्यां स स्थितः कर्तुकामः ॥५१॥

भूमौ कृत्वा वानरं स्कन्धगं तं
हस्तेनाऽथो वादयन् डिण्डिमं च ।
बालानेकीकृत्य तत्र स्थितांश्च
तस्थौ योगी मर्कटं नाटयन् सः ॥५२॥

सद्यो रामो भ्रातृभिः सङ्गतश्च
द्रष्टुं खेलां तत्पुरः सोपविष्टः ।
यो वै लोकान् नाटयन् भाति नित्यम्
नाट्ये मुह्यन् वर्तते किं विचित्रम् ॥५३॥

योगि-स्कन्धे संस्थितश्चाऽञ्जनेयो
नित्यं लीलां कर्त्तुमभ्याजगाम ।
रामस्याऽग्रे दर्शयन् नृत्य-शिल्पम्
जातं नूनं जीवनं धन्यधन्यम् ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वासो रामस्यैव गृह्णन् करेण
पश्यन् लिक्षास्तस्य मूर्ध्नि श्रमेण ।
पादौ द्वावुद्यम्य वै घूर्णनेन
सेवाशक्तो मर्कटोऽभूत् क्षणेन ॥५५॥

रामस्तावत् यत्र यत्रैव यातः
पश्चात्तस्यैव प्लवङ्गोऽनुयातः ।
यद् यद् कर्तुं राघवश्चेष्टते स्म
तत् तत् सर्वं मर्कटोऽपीहते स्म ॥५६॥

ऊर्ध्वं नीचैर्वामतो दक्षतश्च
रामो हर्म्ये यत्र यत्र प्रयाति ।
तत्र प्राप्तस्तत्तदेवाऽनुकारी
छायेवाऽयं मर्कटोऽनुप्रयाति ॥५७॥

नित्यं मे स्यात् वानरोऽयं सहायः
कर्त्तव्यः कोऽप्येतदर्थं ह्युपायः ।
एवं रामश्चिन्तयामास यत्र
माता प्राप्ता किं किमस्तीति तत्र ॥५८॥

ऊचे रामो मर्कटेनाऽभ्युपेतः
कश्चिद् योगी वर्तते पश्य मातः ।
कीशो मह्यं रोचतेऽयं त्वतीव
नित्यं स्थेयादेष भूत्वा ममैव ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

माता श्रुत्वा प्रार्थनां तां सुतस्य
याच्ञां कर्तुं प्राप्तवत्येव सद्यः ।
कीशो मह्यं दीयतां सेत्युवाच
योगी दास्यामीति तां प्रत्युवाच ॥६०॥

अवधपुरि वितत्य चेन्द्र-जालम्
धृत-यति-वेष-शिवोऽक्षिपत् स्वकालम् ।
हरिमपि हरये हरः स दत्वा
मुदितमनाः प्रययौ सभक्ति नत्वा ॥६१॥

आत्रेयोपाऽभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये पञ्चमः सर्ग ईरितः ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

षष्ठः सर्गः

(अनुष्टुप् छन्दः)

रममाणेन रामेण स कपिः स्थापितो गृहे ।
केवलं न तु तस्यैव सर्वेषामभवन् मुदे ॥१॥

स तिष्ठति स्थिते रामे रामे गच्छति गच्छति ।
कूर्दते कूर्दमाने च रामे खेलति खेलति ॥२॥

प्लवङ्गो राघवस्यैवं प्रतिबिम्वमिवाऽऽबभौ ।
दिनानि मासा वर्षाणि सोत्सवं च तयोर्ययुः ॥३॥

कैकेय्या हस्त-पतितात् जन्माऽभूत् पायसात् कपेः ।
अतः कपिर्भरतवद् भक्तो भूत्वा स्थितो हरेः ॥४॥

वंश्यो द्विधा जन्मनाथ विद्यया चाऽपि मन्यते ।
जन्म-वंश्यो यथा रामो विद्या-वंश्यः कपी रवेः ॥५॥

अग्रजाऽनुजवद् राम-हनूमन्तौ बभूवतुः ।
नर-वानरयोश्चैवं चित्रं सख्यं ददर्शतुः ॥६॥

एकदा हरि-रामौ तौ मध्याह्ने सरयूं गतौ ।
विलोकयन्तौ सरितः सुषमां पुलिने स्थितौ ॥७॥

Jayatu Sanskritam, Kaṭhmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कण-लोभेन कमठा नीरात् तीरं समाययुः ।
गोधूमपिष्टगुलिका निर्माय ददतुर्मुहुः ॥८॥

किरणैस्तपनस्यैवं तप्त-देहाः पतत्त्रिणः ।
पक्षान् फट-फटाकृत्य जले सस्नुः पुनः पुनः ॥९॥

सरिन्मध्ये बृहत्मत्स्याः श्वेताः कृष्णा ह्यनेकशः ।
उन्मज्जन्तो निमज्जन्तो रञ्जयन्ति नृणां मनः ॥१०॥

गाहमानैश्च शुण्डेनोत्क्षिपद्भिर्हस्तिभिर्जलम् ।
गन्धीकृतं मदेनाऽथ मृत्स्नया पिच्छिलीकृतम् ॥११॥

जनसम्मर्दतो दूरं पुलिने रहसि स्थिताः ।
जल-क्रीडा-रतास्तत्र युवत्यश्चाऽकुतोभयाः ॥१२॥

उपतीरं तरोर्मूले वेद्यां रहसि संस्थितौ ।
वार्तां राम-हनूमन्तौ चक्राते तौ मिथो ह्युभौ ॥१३॥

कपे त्वं भ्रातृ-तुल्योऽसि स्निह्यामि भरतं यथा ।
अग्रजं मन्यसे त्वं मां सेवसे लक्ष्मणो यथा ॥१४॥

सूर्यात् शास्त्रं त्वयाऽधीतं साङ्गं च सरहस्यकम् ।
ज्ञानं विज्ञानमुभयं करामलकवत्कृतम् ॥१५॥

भूमेर्भाराव्ऽताराय भूमावेवं समागतौ ।
व्यर्थं यातीह नौ कालो विस्मृतोद्देश्ययोरिव ॥१६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

काल-क्षेपो न कर्तव्यः प्रतिज्ञातं यथा पुरा ।
सम्पाद्यं तन्न चेद् भूमाववतारो भवेन्मुधा ॥१७॥

अधस्ताद् हिमवद्देशं पूर्वस्यां रक्षसां गणः ।
लोकान् कष्टं ददातीति ज्ञात्वैवोद्विजते मनः ॥१८॥

यास्यामि यज्ञरक्षाऽर्थं पार्वत्यं युद्ध-कौशलम् ।
मैथिलं च पुरं द्रष्टुं काङ्क्षे प्रकृति-पेशलम् ॥१९॥

कौशिकी-तीर-वास्तव्यो मुनिः कुशिक-नन्दनः ।
गायत्रीमाप्तवान् सूर्यात् यः क्षितौ कीर्तिमान् जनः ॥२०॥

ऋषिः श्वो वा परश्वो वाऽत्राऽऽगन्ता कौशिकी-तटात् ।
साऽनुजं मां समादातुं गन्ताऽस्म्यहमितो गृहात् ॥२१॥

हनूमन् ? त्वमितः शीघ्रं लोक-कल्याण-हेतवे ।
ऋष्यमूकं गिरिं याहि साकेतान्मयि निर्गते ॥२२॥

कुर्वँस्तत्रैव साचिव्यं सुग्रीवस्य स्थितो भव ।
सविस्तरं संस्तवं च तस्य मत्तः शृणुष्व ह ॥२३॥

तदाऽभूतां कीशकुले बालि-सुग्रीव-नामकौ ।
बलवन्तौ भ्रातरौ द्वौ पित्रोराज्ञा-प्रपालकौ ॥२४॥

बाली मघवतः पुत्रो सुग्रीवश्च विवस्वतः ।
पृथक् तौ वपुषा नूनमपृथक् रूप-कर्मतः ॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अशने शयने चाथ खेलने कूर्दनेऽपि च ।
अरण्ये नगरे हर्म्ये तिष्ठतः स्म सदा सह ॥२६॥

पितर्यथ दिवं याते दायाद्यांशे तदा द्वयोः ।
मध्ये प्रवृद्धं मालिन्यं क्रमेणैव मिथस्तयोः ॥२७॥

मितं समुचितं सर्वममितं नाश-हेतुकम् ।
अतो हि लोके मतिमानति सर्वत्र वर्जयेत् ॥२८॥

नियतिं को नु जानाति निखिलं तन्नियन्त्रितम् ।
सर्वं जगत् प्रचलति नियत्यैवाऽभिमन्त्रितम् ॥२९॥

एकदा तु मयः पुत्रो मायावी दानवः क्षितौ ।
अन्वेषयन् प्रतिबलं भ्रमँस्तत्राभितो ययौ ॥३०॥

आगत्य स तु किष्किन्धामर्धरात्रे महासुरः ।
आहत्य गोपुरं तत्राऽऽहूयमानो भृशं स्थितः ॥३१॥

उन्निद्रोऽभूत् तदा बाली निद्राणो रिपु-गर्जनात् ।
ससज्जोऽभिययौ सद्यो गदामादाय मन्दिरात् ॥३२॥

बालिनं निर्गतं ज्ञात्वा सुग्रीवोऽनुजगाम च ।
दृष्ट्वा तावनुधावन्तौ रक्षो भीतो बभूव ह ॥३३॥

राक्षसो दृष्टवानेकमपमार्गं तु गह्वरम् ।
स प्राविशत् कान्दिशीकस्तदन्तस्तदनन्तरम् ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बाली प्राह स सुग्रीवं भ्रातरत्र स्थिरो भव ।
प्रत्यायास्यामि हत्वा तं क्षणं त्वं प्रतिपालय ॥३५॥

प्रतीक्षमाणः सुग्रीवः समयं बहु नीतवान् ।
अथापि नागतो बाली शङ्कापङ्के निमग्नवान् ॥३६॥

नागमत् मेऽग्रजो बाली चैतावत्कालमक्षिपत् ।
नूनं व्यापादितस्तत्र रक्षसेति व्यचारयत् ॥३७॥

मां चाक्रमिष्यत् यदि चेदागमिष्यत् बहिःपुनः ।
इत्याशङ्क्य स सुग्रीवश्चाददात् शैलकं ततः ॥३८॥

पिधाय गह्वरमुखं प्रत्यगात् राज–मन्दिरम् ।
शोकाकुलमभूद्राज्यं ज्ञात्वा तं बालिनं हतम् ॥३९॥

अभावे बालिनस्तत्र बालके चाङ्गदे सति ।
सुग्रीवस्यैव तत्राभूत् रिक्ते सिंहासने स्थिति : ॥४०॥

दिष्टया बाली मृतो नासीत् हतस्तेनैव राक्षसः ।
चिराय युध्वा स ततो गह्वराननमागतः ॥४१॥

अपसार्यैकतस्तत्र शैलकं निर्गतो बहिः ।
व्यलोकयत् स परितः दृष्टः स्वीयानुजो न हि ॥४२॥

बाली बभूव रोषान्धो दृष्ट्वा कमपि तत्र न ।
सिंहासनस्थं सुग्रीवं ज्ञात्वैवात्यन्तकोपनः ॥४३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यं च राज्यलक्ष्मीञ्चोभयं तेन प्रलिप्सुना ।
दरी-मुखन्तु पिहितमद्रिमुत्पाट्य पापिना ॥४४॥

एवमाशङ्क्य बाली तु क्रोधान्धः प्रययौ ततः ।
घातयिष्यामि सुग्रीवमिति तीव्रं जगर्ज सः ॥४५॥

निपत्य पादयोस्तस्य सुग्रीवो राज्यमर्पयत् ।
प्रमादतस्तु यज्जातं क्षमस्वेति न्यवेदयत् ॥४६॥

सत्यं वृत्तं जनैरुक्तं बालिनं तमभूद् वृथा ।
न व्यश्वसीत् स्वमनुजं स जिघांसुरभूत् तदा ॥४७॥

तस्माद् भीतः स सुग्रीवोऽतिवेगेन पलायितः ।
अन्वधावत् रुषा बाली सगदोऽन्तकवद् ततः ॥४८॥

धावं धावमतिश्रान्तो हताशः सूर्यनन्दनः ।
स्वं गोप्तुमिन्द्रपुत्रात् स ऋष्यमूकाश्रमं गतः ॥४९॥

ऋष्यमूके मतङ्गस्य मनोज्ञश्चाश्रमोऽभवत् ।
तन्मुनेः शापतो बाली प्रवेष्टुं तत्र नाशकत् ॥५०॥

मतङ्गेन कथं शप्तो बालीत्येवं स पृष्टवान् ।
राघवोऽपि हनूमन्तं प्रतनं वृत्तमूचिवान् ॥५१॥

पुरा माहिषरूपोऽभूत् दुन्दुभिर्नाम राक्षसः ।
वीर्यं हस्ति-सहस्राणां दधानश्चातिगर्वितः ॥५२॥

कोऽस्ति मत्सदृशो लोके योद्धुमेहीति गर्जनम् ।
कुर्वन् स बालिनश्चाग्रे किष्किन्धां प्राप्तवान् द्रुतम् ॥५३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्पर्धां स दुन्दुभेः श्रुत्वा बाली योद्धुं तदा गतः ।
चिराय युयुधे तेन सार्धं तं निजघान ह ॥५४॥

आदाय यातुधानस्य मृतं देहं ततोऽक्षिपत् ।
मतङ्गस्य मुनेरग्रे तद् वपुर्वेगतोऽपतत् ॥५५॥

मुन्यङ्गेषु तदा लग्ना उत्सिक्ता रक्त-बिन्दवः ।
क्रुद्धो मुनिर्जलं हस्ते गृहीत्वैवं शशाप सः ॥५६॥

कृतं येन कुकृत्यं स ऋष्यमूकाभिधे गिरौ ।
नागच्छेदन्यथा छिन्न-शीर्षो भूत्वा पतेत् क्षितौ ॥५७॥

इन्द्रेण पूर्वं स्मरसि हनुर्वज्र-प्रहारतः ।
द्विधा तव कृतस्तस्य पुत्रो बाली मदान्वितः ॥५८॥

गुरुपुत्रस्य सुग्रीवस्यान्तिकं याहि मारुते ।
साहाय्यं कुरु तस्याहञ्चायास्यामि शृणुष्व मे ॥५९॥

आञ्जनेय ममापि त्वं सहयोगं करिष्यसि ।
राक्षसानां च दुष्टानां मूलं नष्टं भविष्यति ॥६०॥

रामोक्तं सममवगम्य वाक्यजातं
ऊर्जस्वद् वपुरथ मारुतेस्तु जातम् ।
लब्धाज्ञः प्लवगवरः प्रयातुकामः
प्रातिष्ठत् नृपभवनात् कृतप्रणामः ॥६१॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये षष्ठोऽयं सर्ग ईरितः ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सप्तम सर्गः

(रथोद्धताच्छन्दः)

कौशिकी-पुलिन-भूमि-मण्डनो
विश्रुतोऽथ कुशिकर्षि-नन्दनः ।
येन तप्त-तपसा विवस्वतः
भूर्भुवःस्वरिति लभ्यते स्म ह ॥१॥

अध्वरं कमपि कर्तुमुद्यतो
दुष्टराक्षसगणैः कुचेष्टितः ।
स्यात् कथं मम मखस्य रक्षणं
चिन्तितो मुनिरभूत् निरन्तरम् ॥२॥

कोसलेन्द्र-तनया गृह-स्थिताः
निर्भरं दशरथेन लालिताः ।
यापयन्ति समयं वृथैव ते
ह्यानयामि सुतयुग्ममध्वरे ॥३॥

इत्थमेव स विचिन्त्य चेतसि
कौशिकः सपदि कोसलं ययौ ।
अर्चितो दशरथेन सादरम्
तत्र गाधितनयः स्थितः सुखम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पृष्टवान् कुशल-मङ्गलं नृपो
विन्यवेदयदथो मुनिस्ततः ।
राक्षसैर्मख-विघातकैरहं
चिन्तितोऽस्मि नृपते ? दिवानिशम् ॥५॥

रक्षितुं क्रतुमथो विहिंसितुम्
राक्षसान् नृप ?भवत्-सुत-द्वयम् ।
दीयतामिह निनीषुरस्म्यहं
कारयामि सफलं मखोत्सवम् ॥६॥

आगतौ तत उपात्त-विद्यकौ
धन्विनावथ यशस्विनावुभौ ।
शीघ्रमेव भवदात्मजाविमौ
मङ्गलं च जगतो विधास्यतः ॥७॥

वृद्धतामुपगतो नृपस्तदा
तन्निशम्य मनसा व्यचिन्तयत् ।
प्रेषयामि नु कथं सुत-द्वयम्
प्राणतोऽप्यतितरां प्रियं स्वकम् ॥८॥

प्रेषयाम्यथ न चेदिमौ सुतौ
बालिशाविह सदा भविष्यतः ।
निर्णयाय तु तदाक्षमो नृप-
स्त्रीभिरप्यथ विमर्ष्टुमैत् ततः ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लालनेन तनयस्य निर्भरं
मौढ्यमात्रमभिवर्धते पुनः ।
शिक्षणेन यदि सोऽनुशासितः
शोभते सदसि सद्‌गुणान्वितः ॥१०॥

स्त्रीभिरप्यथ विमृश्य तिसृभिः
प्रेषणाय कृतनिर्णयो नृपः ।
कौसलेयमथ लक्ष्मणं तत-
श्चाददत् स निकटं मुनेर्गतः ॥११॥

गृह्यतामिति सुतावुभावपि
वेदनामनुभवन् समार्पयत् ।
भद्रमस्तु भवतामिति ब्रुव-
न्नाशिषा च नृपतिं समर्धयत् ॥१२॥

बाष्पवारि-परिपूर्ण-लोचनाः
स्तब्धतामुपगताः समे जनाः ।
लेशमात्रमपि भूप मा शुचः
सान्त्वनां च मुनिरभ्यदात् ततः ॥१३॥

भूभृतश्च तनयावुभावपि
मातृपितृचरणान् प्रणेमतुः ।
कौशिको मुनिरथो ययौ पुर
स्तावुभाप्यनुगतौ बभूवतुः ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शिक्षितौ मुनिवरेण दीक्षितौ
शस्त्र-शास्त्र-विषये विपश्चितौ ।
राक्षसानथ सुबाहुमुख्यकान्
यज्ञरक्षणविधौ निजघ्नतुः ॥१५॥

निर्भयाविषु-करौ धनुर्धरौ
सुन्दरौ सुचरितौ धुरन्धरौ ।
शिल्पिनौ च मित-जल्पिनावुभौ
स्थापयन् स्वनिकटे मुनिर्बभौ ॥१६॥

एकदा तु मिथिलाधिपेन यत्
प्रेषितं मख-निमन्त्रणं च तत् ।
प्राप्तवान् कुशिकनन्दनो यदा
राघवो जिगमिषुस्त्वभूत् मुदा ॥१७॥

नीतवानथ स रामलक्ष्मणौ
शिष्यकावपि सहायिनावुभौ ।
लौकिकीं विविध-नीति-शास्त्रधीः
शिष्टतां समुपदिष्टवान् मुनिः ॥१८॥

विश्वतो रण-विशारदास्तदा
स्पर्धनाय मिथिलां समागताः ।
रङ्गभूमिमुपसृत्य ते स्वकं
पौरुषं प्रकटनाय चोत्सुकाः ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अश्व-हस्ति-रथ-धावनं तथा
शस्त्र-चालन-विधिः प्रदर्शितः ।
कन्दुकोत्प्लवनमप्सु मज्जनम्
रज्जु-कर्षण-प्रभृत्यनुष्ठितम् ॥२०॥

क्षत्रियाश्च परितः समागताः
राक्षसा दशमुखादयस्तथा ।
आगता हि विपुलं रणाङ्गणम्
स्वां तदाहव-कलां प्रदर्शितुम् ॥२१॥

कोऽपि यः शिव-धनुः करे दधत्
वीर्यवान् सदसि तोलयिष्यति ।
तं क्षमं विजयिनं महोत्सवे
भूमिजा मम सुता वरिष्यति ॥२२॥

सङ्गरं स जनको यदा व्यधात्
भूभृताः समभवन् समुत्सुकाः ।
तोलनाय शिवकार्मुकं समे
प्रायतन्त निकषैव सङ्गताः ॥२३॥

नैव कोऽपि सफलो ह्यदृश्यत
सर्व एव विफलो हतप्रभः ।
अक्षमो नतशिरास्तदा स्वकं
स्थानमेत्य मलिनाननः स्थितः ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रावणोऽपि गतवान् दशाननो
लज्जितः समभवद् नताननः ।
मर्द्दयन् करतले सजृम्भणं
तस्थिवान् स च विमूढधीरिव ॥२५॥

कौसलेयमथ कौशिकोऽब्रवीत्
गच्छ वत्स प्रयतस्व निर्भयम् ।
सोऽभ्युपेत्य समतोलयत् धनु-
स्तत् त्रिधैव निपपात खण्डितम् ॥२६॥

रावणोऽथ नितरां क्रुधान्वित-
श्चेर्ष्यया रघुवरं न्यभालयत् ।
मैथिलीमथ विलोकयन् खलः
सद्य एव मनसि व्यचारयत् ॥२७॥

जात्वियं जनकनन्दिनी मया
स्वाङ्कगा किल विधास्यते क्वचित् ।
पौरुषं सुविदितं भविष्यति
मानसं च मम शान्तिमेष्यति ॥२८॥

मानुषात् तव वधो भविष्यति
मां पुरैव विधिरेवमुक्तवान् ।
शल्यविद्ध इव संस्मरँश्च तत्
राघवाद् दशमुखो विभीतवान् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राम एष रघुवंशजो युवा
वीर्यवानतितरां व्यलोक्यत ।
किं न्वयं मम निषूदने क्षमो
वत्स्यतीति समभूद् स शङ्कितः ॥३०॥

क्षत्रियस्य कुलानाशने दृढम्
सोऽस्मरत् सपदि भार्गवं पुनः ।
राघवः शिवधनुर्विभङ्क्तवान्
सूचयामि तमिति व्यधान् मनः ॥३१॥

"क्रुद्ध एव स इहागमिष्यति
कार्मुकं स च निभालयिष्यति ।
संशयो नहि दधन् परश्वधं
राघवं यमपुरीं प्रणेष्यति ॥३२॥"

रामतो भयमावाप्य रावणो
निर्जगाम च महेन्द्र-पर्वतम् ।
भार्गवं निखिलवृत्तमूचिवान्
सोऽप्यभूत् सपदि गन्तुमुद्यतः ॥३३॥

"क्षत्रियाधममिमं स राघवं
पापिनं शिवधनुर्विभञ्जकम् ।
गम्यतां द्रुतमितो निहन्यताम्"
भार्गवं दशमुखो न्यवेदयत् ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कम्पयन्नथ महेन्द्र-पर्वतं
तर्जयन् स च पुनर्दिशो दश ।
उत्त्थितः परशुराम आसनात्
राघवं त्वपररामममीयिवान् ॥३५॥

प्रेष्य तं दशशिरा मुदान्वितः
सिंहलं प्रतिययौ गदाञ्चितः ।
भार्गवश्च मिथिलापुरीं गतः
राघवस्य पुरतोऽभवत् स्थितः ॥३६॥

वह्नि-सन्निभमृषिं क्रुधान्वितं
राघवः प्रणुतवान् मुदान्वितः ।
क्षेम-वाक्यमपि पृष्टवान् स तं
प्राञ्जलिः सविनयं समुत्त्थितः ॥३७॥

भार्गवं च निखिलां स राघवो
जीर्ण-कार्मुक-कथामवर्णयत् ।
तत् स्वतः समभवद् विखण्डितं
तं यथास्थितिमथो न्यवेदयत् ॥३८॥

वृत्ततत्त्वमधिगम्य भार्गवो
शान्तिमाप स ततो गिरिं ययौ ।
राघवस्य धवलं यशस्तदा
रश्मिजालसममाभुवं बभौ ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राघवो दशरथात्मजस्ततः
सीतया दयितयाभवद् वृतः ।
उत्सवश्च विहितो जनैर्बृहन्
हर्षिता नगरवासिनोऽभवन् ॥४०॥

पत्रकं च जनकेन तत्क्षणम्
प्रेषितं दशरथस्य चान्तिकम् ।
भूपतिश्च तनयैस्त्रिभिर्युतः
सत्वरं स मिथिलामुपागतः ॥४१॥

गोपुरं दशरथो यदाऽऽप्तवान्
स्वागताय जनकः प्रतस्थिवान् ।
मैथिलेन विधिना सभाजितः
पार्थिवोऽतिथिगृहं ययौ ततः ॥४२॥

सूनवस्त्विह तु वेद-संख्यकाः
पाणि-पीडनवयोभिरन्विताः ।
तत्र चाप्यथ चतसृ-कन्यकाः
स्वानुरूपवरमाप्तुमुत्सुकाः ॥४३॥

अग्नि-संज्वलन-पूर्वकं ततः
सोत्सवं परिणयश्च साधितः
मेलनञ्च वरकन्ययोस्तयोः
सक्रमं समभवद् द्वयोर्द्वयोः ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जानकी क्रमत ऊर्मिला तथा
माण्डवी च श्रुतकीर्तिनामिका ।
दिव्यभूषण-विभूषितात्मजाः
भूभृता सविनयं समर्पिताः ॥४५॥

सम्मुखं दशरथः समाययौ
कौशिकस्य चरणौ स्पृशन् बभौ ।
हर्षवारि-परिपूर्ण-लोचनः
सञ्जगाद तमृषिं यशोधनः ॥४६॥

शिक्षितं सविधि मत्सुत-द्वयम्
राम एष जितवान् धनुर्मखम् ।
सूनवः परिणयेन संस्कृता
सर्वतो विलसिता भवत्कृपा ॥४७॥

व्यक्तवान् दशरथः कृतज्ञताम्
सूनवः प्रणुनुवुर्गुरोः पदम् ।
कौशिकश्च वितरन् शुभाशिषः
प्रेष्य तान् प्रतिययौ निजाश्रमम् ॥४८॥

सस्नुषो दशरथः सपुत्रको
वाजि-हस्ति-मणि-रत्नसम्पदः ।
सन्निधाय सकलं रथेषु स
प्राप्तवान् स्वनगरीं जनैर्युतः ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राघवो विधृत-चाप-सायको
राज्य-कर्मणि पितुः सहायकः ।
वीक्ष्य तं दशरथः क्षमं यतो
यौवराज्य-पदवीं ददौ ततः ॥५०॥

राम एष युवराज एव न
सोऽधुना नृपपदाय चार्हति ।
मन्त्रिणो मनसिकृत्य भूभृतं
ते व्यधुः सविनयं निवेदनम् ॥५१॥

वृद्धतामथ विभाव्य च स्वकम्
राज्य-धूर्वहन-कर्मणि क्षमम् ।
ज्येष्ठमात्मजमथो नृपासने
सोऽभिषेक्तुमभिकाङ्क्षति स्म ह ॥५२॥

योग-कर्मणिरतः कपिस्त्विह
सन्निमील्य नयने दृढं स्थितः ।
दिव्यदृष्टिमभितो क्षिपद् यदा
राघवस्य पुरमीक्षिवाँस्तदा ॥५३॥

महोत्सवार्थं बहुकल्पितानि
ध्वजैः पताकाभिरलङ्कृतानि ।
सुधा-प्रलिप्तानि मनोहराणि
विभान्ति साकेत-निकेतनानि ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राम एष किल सीतयान्वितो
मातृ-पितृसहितो गृहे स्थितः ।
विस्मृतः किल-पुरोदितं वच
इत्यचिन्तयदिहाञ्जना-सुतः ॥५५॥

नोचितं यदि स राज्यकर्मणि
व्यापृतो भवति तत्र विद्विषाम् ।
दण्डनाय प्रयतेत कोऽधुना
रक्षणाय च सतां तपस्विनाम् ॥५६॥

मारुतिः शिवमिदं न्यवेदयत्
मन्थरामथ शिवोऽप्यचोदयत् ।
सात्वभूत् कुटिलता-धुरन्धरा
केकयी-धियमतोऽन्यथाकरोत् ॥५७॥

पूर्वदत्त-वचनः स भूपतिः
केकयीमथ कनीयसीं प्रति ।
अत्युदारहृदयस्तदाभवत्
तां प्रसादयितुमेव सोऽवदत् ॥५८॥

राम एष वनमद्य संव्रजेत्
वत्सरानथ चतुर्दश क्षिपेत् ।
त्वत्सुतस्तु भरतो नृपो भवेत्
सैव राज्य-धुरमत्र संवहेत् ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तद्वचो हृदि निधाय राघवः
कानन प्रति तदा मनो दधौ ।
धारयन् वपुषि पीत-वाससी
सम्मुखं स तु पितुः पुरो ययौ ॥६०॥

सीतयापि सह लक्ष्मणेन च
राघवस्तु विपिनं ययौ ततः ।
चित्रकूटमधितस्थिवान् यदा
भूपतिर्दशरथो मृतः शुचा ॥६१॥

पितृवाक्यमनुयाति जीविते
श्राद्ध-कर्मणि रतस्तथा मृते ।
नारकात् पुमिति नामकात् तु य
स्तारकः सुत इतीर्यते किल ।६२॥

तावुभौ नृपसुतौ शुचा युतौ
चान्त्यकर्मणि पितुः समुद्यतौ ।
स्नान-दान-विधिनानुपद्धति
चक्रतुर्निखिलमेत्य रोधसि ॥६३॥

काननं व्यचरदेकदा मृगः
काञ्चनेन वपुषाभितस्ततः ।
राघवो ददृशिवान् यदा तु तम्
मैथिलीं च समदर्शयत् स्वयम् ॥६४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जानकी पटकुटीरसंस्थिता
दृष्टवत्यथ बहिः समागता ।
रक्षितुं तमुटजे समुत्सुका
साब्रवीत् रघुपतिं पुरो गता ॥६५॥

सत्वरं दयित गम्यतामितो
गृह्यतां हरिणपोतकं ततः ।
दीयतामहमिह स्वसन्निधौ
स्थापयामि कृपया यतस्व भोः ॥६६॥

नात्र काञ्चनमयो मृगः क्षितौ
दृष्ट एव न तु केन चिच्छ्रुतः ।
विभ्रमेण तु धियः स राघवो
रक्षसा छलितवानहो वत ॥६७॥

सानुजः स मृगमार्गणे गतो
जानकी स्थितवती तदैकला ।
राघवो मृगमरीचिकानुगः
प्राविशत् स विपिनं महत् ततः ॥६८॥

रावणो यति-वपुर्दशाननो
राघवोटजमुपेयिवानथ
लब्धवानवसरं ससाध्वसं
मैथिलीमपजहार तत्क्षणम् ॥६९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

गृध्रराडथ जटायु-नामको
दृष्टवान् नभसि तं रथ-स्थितम् ।
योद्धुमेत्य सह तेन निर्गत
श्चाहतस्त्रुटित-पक्षकोऽभवत् ॥७०॥

राघवश्च विपिने सलक्ष्मणो
दृष्टवान् खगममुं विलुण्ठितम् ।
त्यक्तवान् स्ववपुषं स गृध्रराट्
प्राददत् रघुपतिं परां गतिम् ॥७१॥

रोदनं त्वतितरां प्रकुर्वती
पाहि मामिति गदन्त्यनारतम् ।
न्यक्षिपद् भुवि विगुण्ठ्य वाससा
भूषणान्यपि ततो विहायसा ॥७२॥

ऋष्यमूक-शिखरं ह्यनातपम्
कोऽपि वानर उपेत्य संस्थितः
भूषणानि पतितानि तत्पुर-
स्तत्क्षणं स सुगलं समार्पयत् ॥७३॥

किंकिमस्ति कथमागतं वदन्
दृष्टवान् स सुगलः सविस्मयम् ।
भूषणानि किल तानि गह्वरे
रक्षणाय च समादिशत् कपिम् ॥७४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एवमेव समये गते सति
पर्वतान्तिकमथैकदा कपिः ।
दृष्टवान् जनयुगं धनुर्धरम् ।
जूटिनं विधृत-पीतवाससम् ॥७५॥

अभ्युपेत्य सुगलं तमूचिवान्
सोऽपि गह्वरमुखं तदेयिवान् ।
सन्ददर्श निपुणं समन्ततः
प्रोक्तवान् रहसि मारुतिं तत : ॥७६॥

बालिनेह मनुजौ धनुर्धरौ
प्रेषितौ किमु निहन्तुमेव माम् ।
मारुते श्रृणु बिभेमि निर्भरम्
कुत्र यानि करवाणि किं न्वहम् ॥७७॥

काविमौ कथमिहागताविति
याहि तत्र-निपुणं विबुध्य च ।
सत्वरं तत उपेत्य विस्तृतम्
त्वं सखे मम पुरो निवेदय ॥७८॥

मारुतिस्त्वथ सुकण्ठ-नोदित-
स्तत्क्षणं विधृत-विप्र-विग्रहः ।
ऋष्यमूक-शिखरादधो भुवं
प्राप्तवान् सविनयं तयोः पुरः ॥७९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्याम-गौर-वपुषौ धनुर्धरौ
क्षत्रियावथ विशाल-वक्षसौ ।
कोटि-काम-सदृशाङ्ग-शोभिनौ
मारुतिर्ददृशिवान् वयःसमौ ॥८०॥

पद्म-कुड्मल-दृशौ विलक्षणौ
जानु-चुम्बित-करौ सुलक्षणौ ।
दुष्ट-निर्दलन-कर्मणि क्षमौ
संददर्श पथि राम-लक्ष्मणौ ॥८१॥

राम-लक्ष्मण-समीपगः कपि-
स्तस्थिवान् नुत-शिरस्तदैव हि ।
सोदराविव विभाव्य तावुभौ
साश्रुदृक् प्लवगसत्तमो बभौ ॥८२॥

कौ न्विमौ परिचितौ मया किमु
बान्धवाविव मनः प्रसीदति ।
स्नेह उच्छलति मेऽद्य चेतसि
कोऽत्र हेतुरिति स व्यचिन्तयत् ॥८३॥

सादरं प्रणमनं निवेदितम्
स्वागतं सविनयं तदेरितम् ।
कारणं किमिति वेत्तुमिच्छता
प्रस्तुतञ्च कपिना मनोगतम् ॥८४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुस्वरं वदति देवभाषितं
शब्दशास्त्रमधिगच्छतीत्यतः ।
वेद्म्यहं वचन-शिल्पिनं त्वमुम्
लक्ष्मण त्वमपि संस्कृतं वद ॥८५॥

विप्रवर्य शृणु लक्ष्मणोऽस्म्यहम्
सोऽग्रजः किल ममैव राघवः ।
भ्रातृपत्न्यपहृता छलेन मे
मार्गणञ्च विपिने प्रकुर्वहे ॥८६॥

उक्तवानथ यदा तु लक्ष्मणो
वृत्तजातमचिरं चिरन्तनम्
संस्मरन् निखिलमेव मारुति-
स्तत्क्षणं चरणयोर्व्यधात् नुतिम् ॥८७॥

दुष्ट-निर्दलन-कर्मणि क्षमः
सज्जनस्य च सुरक्षणव्रती ।
मानुषेण वपुषा हरिः स्वयम्
प्राप्तवानिति कपिर्व्यभावयत् ॥८८॥

विप्रदेव कृपया स्वसंस्तवम्
विस्तरं वद समुत्सुकोऽस्म्यहम् ।
पृष्टवानथ स लक्ष्मणो यदा
प्रोक्तवान् कपिरसौ तदा मुदा ॥८९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ऋष्यमूक इति पर्वतो बृहन्
एष यस्य शिखरे वसाम्यहम् ।
तत्र चास्ति हि सुकण्ठ-नामको
विश्रुतश्च कपि-यूथपः प्रभो ॥९०॥

सेवकोऽस्मि किल तस्य शत्रुणा
सोदरेण भयमेति बालिना ।
घातयिष्यति स मामिति स्थित-
स्तर्कयन् मनसि तत्र भीरुकः ॥९१॥

स्वामिनो मम रिपोस्तु बालिनो
मर्द्दनाय भवतो भवेन् मनः ।
अग्रजस्य दयितां तवापि स
मार्गणाय च यतिष्यतेऽभितः ॥९२॥

इति निगदितवन्तमाञ्जनेयम्
मुदितमनाः श्रुतवाँश्च रामचन्द्रः ।
द्रवितहृदय एष वायुसूनुम्
कपिमथ निर्भरमालिलिङ्ग सद्यः ॥९३॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः।
हनूमदयने काव्ये सप्तमः सर्गा ईरितः ॥९४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अष्टमः सर्गः

(आर्याच्छन्दः)

स्व-स्कन्धयोः सलीलं दशरथ-तनयावुभौ निधायाथ ।
कपिरारुरोह मन्दं सानन्दं शिखरि-निःश्रेणीम् ॥१॥

उद्धरणाय धरित्र्या अवतारवतोस्तयोर्वपुर्युगलम् ।
कोमल-कुड्मल-सदृशं कमल-सुमस्येव शोभते रम्यम् ॥२॥

भ्रमणातिशय-श्रान्तौ काञ्चन-गिरिमागतौ युगपदेव ।
एतौ नु पुष्पवन्तौ विलसन्तौ स्कन्धयोस्तस्य ॥३॥

आरुह्य शिखरि-शिखरं युव-युगलं चाप्यवारोह्य ।
आस्तीर्य दर्भ-सुकटं स कपिः स्थातुं न्यवेदयत् तत्र ॥४॥

कावपरिचितावेतौ काञ्चनगिरिमागतावद्य ।
स्ववैद्याविव भूमाविति स शशङ्केऽथ सुग्रीवः ॥५॥

सुचिरं प्रतीक्षमाणं स्वमनुचरं तमनुजेन निभम् ।
दर्श दर्श रामः प्रमोदमाप स्वयं चान्तः ॥६॥

सुग्रीवः सानुचरो वनेचराणां सपर्यया तत्र ।
सत्कृत्यातिथि-युगलं स्वागत-वाचं तदैवोचे ॥७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कुशल-क्षेममुभयतो विनिमय्य परस्परं स्वीयम् ।
मुख्ये विषये च तयोर्वार्ता समभूत् रहस्येव ॥८॥

दुष्टं बालिनमाहवमध्ये नूनं हनिष्यामि ।
तत्र समेषां पुरतः शपथं कृतवान् स्वयं रामः ॥९॥

प्रेष्य च कपि-भल्लूकान् कुत्रास्ते जानकीति विज्ञाय ।
निवेदयिष्याम्येवं सत्यङ्कारं व्यधात् स सुग्रीवः ॥१०॥

द्वावप्यथो व्यधत्तां परस्परं वह्निसाक्षिणीं मैत्रीम् ।
सन्मित्रवत् सदा तौ व्यवहर्त्तुं प्रत्यजानीताम् ॥११॥

पोट्टलिकां पूर्वतनीं वाससि निर्ग्रथ्य खात् क्षिप्ताम् ।
कपिनैकेन च लब्धां सुरक्षितां दर्शयिष्यामि ॥१२॥

इति कथयन् सुग्रीवो गुहां प्रविष्टस्तदादातुम् ।
प्रादर्शयत् यदैव जगाद रामस्तदैव सौमित्रिम् ॥१३॥

लक्ष्मण पश्याभरणं स्वर्णमयं भ्रातृ-जायायाः ।
तस्या एवेति विभावयाम्यहं परिचिनु त्वमपि ॥१४॥

एवं ब्रुवन् स रामो द्रष्टुं निजगाद लक्ष्मणं भूषाम् ।
विलोक्य सौमित्रिरसौ न्यवेदयत् राघवं चेत्थम् ॥१५॥

जानामि न केयूरे नैव च जानामि कङ्कणे तस्याः ।
जानामि नूपुरे द्वे केवलमनिशं प्रणाम-कृत्येन ॥१६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

लक्ष्मणमवदत् रामः शङ्कामस्मिँस्तु मा कार्षीः ।
निखिलं भूषणजातं तस्या एवेति विश्वसिमि ॥१७॥

कङ्कण-युगलं दृष्टं नूपुर-युगमञ्च चुम्बितं प्रेम्णा ।
काञ्चनमथ मणि-जटितं केयूरन्तद् हृदि न्यस्तम् ॥१८॥

पश्यन्नपि भूषणमिह सीते त्वां नैव पश्यामि ।
क्व गता दयिते मयि ते स्नेहोऽद्यत्वे कुतो लुप्तः ॥१९॥

विलपन्नेवं रामः प्रलपन् सद्यः स मूर्च्छनामाप ।
निःस्तब्धं तत्राभूत् वातावरणन्त्वसामान्यम् ॥२०॥

शक्ष्यति न वा निहन्तुं बालिनमजिरं गतो रामः ।
इति सुग्रीवस्य मनः शङ्का-पङ्केन पिच्छिलं जातम् ॥२१॥

एवं विशङ्कमानो रामं तं रहसि नीतवान् यत्र ।
पप्रच्छ स सानुनयं मित्र कथं त्वं ममाग्रजं हंसि ॥२२॥

बाली मदग्रजः सोऽतिदुष्टहृत् क्रूरकर्मा च ।
ममापि दयितां हृत्वा पम्पापुर्यां वसन्नास्ते ॥२३॥

तेनागम्ये शिखरे निवसाम्यत्रैव ऋष्यमूकाख्ये ।
कश्चन सुदृढोपायो विधीयतां तद्विघाताय ॥२४॥

श्रुत्वा सुग्रीवोक्तं दृष्ट्वैवं तं ससाध्वसं भूयः ।
रामोऽवोचत् मित्र धैर्यं भवता तु न त्याज्यम् ॥२५॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कर्तव्या नाशङ्का परीक्षितव्यस्त्वयाहं च ।
विश्रम्भार्थं मित्र तव किं करवाणि प्रोच्यतामत्र ॥२६॥

सोवाच पुरोवर्ती गिरिरेषः खं स्पृशन्निवाभाति ।
बाणेन मन्त्र-पूतेनैनं त्वरितं रसातलीक्रियताम् ॥२७॥

सन्त्यत्र ताल-तरवः स्थिताः क्रमेणैव सप्त सङ्ख्याकाः ।
इषुणैकेन समेषां क्रियतां निमिषेण भेदनं तेषाम् ॥२८॥

रामस्तथैव कृतवान् यथा गदितवान् स सुग्रीवः ।
कपि-भल्लूकैर्ध्वनितं जय-शब्दं तत्र सुश्राव ॥२९॥

क्रियतां मयि विश्रम्भो रामोऽवोचत् स बालिनं चैवम् ।
यम-पथ-पथिकं तमहं कृत्वा त्वां मोचयिष्यामि ॥३०॥

साकेतात् द्वौ मनुजौ कर्तुं सुग्रीव-साहाय्यम् ।
गिरि-शिखरं सम्प्राप्ताविति स चरेभ्योऽशृणोद् बाली ॥३१॥

अनुभवति हि कातरतां वानर-नाम्नैव नरजातम् ।
भल्लूकाख्यां शृण्वन् भीलुकवत् पलायते दूरम् ॥३२॥

इच्छति सुग्रीवस्त्विह नर-साहाय्येन वानरं जेतुम् ।
इत्यट्टहासमकरोत् बाली स्वीये सभा-मध्ये ॥३३॥

अन्येद्युः सुग्रीवः समाह्वयत बालिनं योद्धुम् ।
आदाय गदां सोऽपि गर्ज गर्ज समायातः ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुग्रीव-बालिनौ तौ योद्धुमथोपस्थितौ विलोक्यैव ।
कर्तुं तत्साहाय्यं स्थितवान् तत्रैव कौशलेयोऽपि ॥३५॥

परस्परं ययुधाते सगदौ वीरौ चिराय तुल्य-बलौ ।
न शाशाक च कोऽपि तयोः कमपि ह्येकं पराजेतुम् ॥३६॥

प्रहर्त्तुकामं सुगलं नियमानुल्लङ्घ्य युद्धस्य ।
इषुणा जघान रामो बालिनमथ दर्हृदं सुहृदः ॥३७॥

जगति हि सर्वं साध्यं सुहृद्वतां किमपि नैव दुःसाध्यम् ।
सुग्रीवो राजाभूत् तथाङ्गदश्चापि युवराजः ॥३८॥

सर्वं दुःखं गलितं दलितो दुष्टस्तथा बाली ।
मैत्री फलिता दयिता लब्धा तुष्टोऽभवत् स सुग्रीवः ॥३९॥

मित्रेणानुज्ञातः पर्वतशिखरात् सलक्ष्मणो रामः ।
अद्रिं प्रवर्षणाख्यं प्रतस्थिवान् विजित-शत-कामः ॥४०॥

स्थित्वा प्रवर्षण-गिरौ स्मृत्वा नित्यं प्रियां सीताम् ।
क्लेशं त्वसहत रामो मनोज्ञतायाः परं धाम ॥४१॥

सुग्रीवस्य भटास्ते ज्ञात्वा सीतेति कुत्रास्ते ।
आदाय कदा वृत्तं समुपैष्यन्तीत्यचिन्तयद् रामः ॥४२॥

स रतो हि राज्य कृत्ये सुरतः प्रियया विनोदकृत्ये च ।
सुग्रीवो विस्मृतवान् दिनेषु यातेषु पूर्वतन-वृत्तम् ॥४३॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जाया-माया-कायास्वनिशं संलग्नतावशादेवं
छाया-पथं प्रयातं पूर्वं तेन प्रतिज्ञातम् ॥४४॥

हत्वा बालिनमाहवे समभिषिच्यैवं नृपस्यासने
सुग्रीवञ्च तमङ्गदं पुनरथाधात् यौवराज्ये पदे ।
भूयो मारुत-नन्दनं च महता संवर्ध्य प्रेम्णा पुनः
रामो वै विलपन् प्रवर्षणगिरौ संतस्थिवान् सानुजः ॥४५॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्येऽष्टमोऽयं सर्ग ईरितः ॥४६॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नवमः सर्गः

(वियोगिनीच्छन्दः)

अथ तौ रघुवंशजावुभौ
निवसन्तावुटजं गिरि-स्थितम्।
क्व भवेज्जनकात्मजेति सा
विलपन्तौ नितरां बभूवतुः ॥१॥

उटजाद् बहिरेव लक्ष्मणः
परितो वीक्ष्य तदारुदत् भृशम्।
दयितामथ मैथिलीं स्मर-
न्नुटजान्तो व्यलपत् स राघवः- ॥२॥

न परिष्वजते प्रियाधुना
न च निद्रा नयने विचुम्बति।
समये तु विपर्यये सति
विपरीते मयि ते उभे अपि ॥३॥

तव चुम्बन-कर्मणि प्रिये
न भवेत् श्मश्रु कपोल-वेधकम्।
इति चिन्तयतापसारितं
वदनं कापुरुषाय कल्पते ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

श्वशुरोपहृतं प्रलम्बितम्
हृदि कण्ठाभरणं मनोज्ञकम् ।
अभवत् परिरम्भ-विघ्नदं
किल मत्वा ह्यपसारितं पुरा ॥५॥

सरितो विपिनानि पर्वता-
स्त्वधुनैते व्यवधान-कारकाः ।
अत एव न सङ्गमो मिथः
कथमेतानपसारये बत ॥६॥

नरिनृत्यति मत्पुरस्थितः
प्रियया सार्धमितः शिखावलः ।
कुरुते परिचुम्बनं मुहु
र्मम चेतस्त्वतिवेलमीर्ष्यति ॥७॥

श्वशुरावनुजौ च मातरो
गुरवो मन्त्रिगणः स्नुषाजनः ।
क्व गता वद जानकीति माम्
यदि पृच्छन्ति भवेत् किमुत्तरम् ॥८॥

व्रततिस्त्विह कुड्मलायते
विटपी चाप्यथ पल्लवायते ।
उभयोर्मनसा विचेष्टितम्
पवनः सूचयितुं त्वरायते ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधुना तरुणीयतेतराम्
प्रकृतिः सा प्रविभाति पुष्पिणी ।
ऋतुरेष विभाव्य सार्तवाम्
प्रविधातुं स्मर-यज्ञमुन्मनाः ॥१०॥

प्रविलोक्य हि काञ्चनं मृगम्
मृगयार्थं त्वहमुद्यतोऽभवम् ।
विपिनं तु प्रविष्टवान् यदा
रिपुणा तत्र हृता मम प्रिया ॥११॥

निखिले जगति ह्यसम्भवोः
हरिणः स्वर्णमयस्तु जीवितः ।
अथ विभ्रमतां गता मति-
स्त्वत एवास्ति ममेदृशी स्थितिः ॥१२॥

विपिने त्वधुना चरन् मृगो
यदि कुत्रापि मया विलोक्यते ।
घटनां प्रतनां स्मरँस्तदा
हृदि पीडातिशयोऽनुभूयते ॥१३॥

क्व गता दयिते क्व च स्थिता
विरहे मां विनिमज्य दुर्हृदे ।
अनिशं च तवैव संस्मरन्
समयस्त्वत्र मया प्रणीयते ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रकृतेः सुषमा पि साधुना
विषमां याति वियोगहेतुना ।
इति राघवनिर्गतस्ततः
पुरतो भ्रातुरुवाच स स्थितः ॥१५॥

प्रिय ! लक्ष्मण ? नौ दिनानि च
व्यतियातानि बहून्यथापि सः ।
सुगलः कपि-यूथपः कथम्
न किमप्यत्र करोति सूचनम् ॥१६॥

विनिषूद्य च बालिनं खलं
ह्यभिषिच्याथ नृपासनेऽपि तम् ।
अथ तद्-दयितां रुमामपि
तदधीनां कृतवान् तदा त्वहम् ॥१७॥

सुगलो न कथं स्मरत्यहो ?
शपथं पूर्वतनं स्वयं कृतम् ।
न किमप्यथ सूचितं किल
निखिलं प्राप्य खलेन विस्मृतम् ॥१८॥

सुगलस्त्वधुनापि नागतः
स्वयमुक्तं कृतवान् न वा यतः ।
तमुपेत्य विदन् ततोऽखिलं
समुपेहीति जगाद राघवः ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

कपि-यूथप-गह्वरं प्रति
त्वमितो याहि ममानुज ? द्रुतम् ।
सुगलं परिपृच्छ किं सखे ?
सहृदः कर्म कुतो बिलम्बितम् ॥२०॥

समवाप्य निजां प्रियामिह
कपि-राज्यञ्च स्थितः सुखेन ह ।
शपथं हि पुरा गृहीतवान्
विपथं यास्यधुना कथं बत ॥२१॥

इति राघव-चोदितोऽनुजो
धनुरुद्यम्य स लक्ष्मणो बभौ ।
कृत-लोहित-लोचनो रुषा
विदधत् कार्मुक-झङ्कृतिं ययौ ॥२२॥

धनुषो ध्वननं यदाश्रृणोत्
सुगलस्तत्र ससम्भ्रमोऽभ्रमीत् ।
सदरः स दरीं प्रविश्य च
त्वरितं मारुतिमब्रवीद् वचः- ॥२३॥

अयि ? केशरिनन्दन ? त्वया
धनुषष्टङ्करणं श्रुतं न वा ।
ननु रोष-युतः स राघवो
ह्यनभीष्टं किमपीह चेष्टते ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नृप-कर्मणि सङ्गतस्य मे
सखि-कृत्येऽनवधानताभवत्।
अत एव रुषा स राघवो
ननु चोद्यमस्य धतुः समागमत् ॥२५॥

शमनाय विवृद्ध-कोपिनः
प्रभुरन्यो जगतीह कोऽपि न।
प्रविधेहि किमप्यतो द्रुतं
प्रशमं यातु विपत् पुरःस्थितम् ॥२६॥

इति तस्य वचो निशम्य सः
सगदो वायुसुतः समुत्त्थितः।
निजगाद च यामि कीशप ?
वस निःशङ्कमधीरतां त्यज ॥२७॥

प्रथमं युवराजमङ्गदम्
नल-नीलौ पनसं बलीमुखम्।
कपि-भल्लुकयूथ-यूथपान्
कपिराज ? त्वरितं समाह्वय ॥२८॥

प्रहिता दश दिक्षु तेऽखिला
अथ सीतां परिमार्गयन्त्वितः।
यदि नैव विधीयते त्वरा
निखिलं यास्यति नास-शेषताम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुगलः श्रुतवान् कपीरितम्
स समाहूय चमूं चमूपतीन् ।
परिमार्गयितुं च जानकीम्
निखिला यान्त्विति कार्यमादिशत् ॥३०॥

श्रृणुतात्र गवेषाणावधिः
किल मास-त्रयमेव दीयते ।
मिलिता यदि मैथिली शिवम्
न हि चेद् वो ह्यशुभं भविष्यति ॥३१॥

सुगलेन यथोदितं तथा
कपि-भल्लूक-गणाः प्रचोदिताः ।
पुलिनादथ सागरस्य ते
किल सीतापरिमार्गणे रताः ॥३२॥

अथ केचन प्राग्दिशं गताः
ययुरन्येचन तूत्तरां दिशम् ।
वरुणस्य दिशं तथेतरे
अवशिष्टाश्च सरस्वतस्तटे ॥३३॥

समुपागतवान् स लक्ष्मणः-
किल पम्पापुर-गोपुरान्तिकम्
स्वनयन् धनुषः स्वनं पुन-
र्गिरमूचे क्रुधि पावकोपमः ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अयि ? वानर ? वर्तसे क्व नु
दयितां प्राप्य पुरा यदुक्तवान् ।
सकलं किल विस्मृतं त्वया
बहिरायाहृचमभ्युपेयिवान् ॥३५॥

पुनरप्यथ विप्रवेष-धृक्
स हनूमान् प्रययौ तदन्तिकम् ।
प्रणिपात-पुरस्सरं तदा
विनयेनैव तदग्रतोऽभवत् ॥३६॥

अथ मारुतिमाह लक्ष्मणः
क्व च सुग्रीवखलस्तु वर्तते ।
अधुना सकुलं कृतघ्नकम्
यम-मार्गं वद दर्शयाम्यहम् ॥३७॥

नरपुङ्गव ? हे धनुर्धर ?
कपिरूचे कृपया क्षमस्व ह ।
परिमार्गयितुं स जानकीम्
कपि-भल्लूक-कुलं समादिशत् ॥३८॥

स निशम्य कपि-प्रभाषितम्
क्रमतः शान्तिमवाप लक्ष्मणः ।
दहनस्तु यथा पलालगो
शमनं तत्क्षणमेव याति ह ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अधुना त्वहमेमि मारुते ?
हृयुटजे केवलमस्ति मेऽग्रजः ।
निगदन् स्वकुटीं परावृत-
स्तत एवं पुनरेव लक्ष्मणः ॥४०॥

अचिरं हनुमाँश्च जग्मिवान्
सुगलं तत्सकलं समूचिवान् ।
मुदितः स दिवाकरात्मजः
वचनं वायुसुतं तदोक्तवान् ॥४१॥

त्वमितोऽब्धितटं प्रयाहि भोः
द्रुतमायाह्यवगत्य विस्तरम् ।
किमभूत् परिमार्गणे विधौ
निखिलं ब्रूहि सखे ? यथातथम् ॥४२॥

अथ केशरिनन्दनो गतो
द्रुतमब्धेः पुलिनं ततस्थितः ।
स विवेद यदा ततस्त्यकम्
वदनं चाप्यभवत् मलीमसम् ॥४३॥

अटवीषु सरः सरित्सु च
सम-भूमौ गिरि-गह्वरेषु च ।
नगरीषु वनाश्रमेषु ते
विचरन्तो ददृशुर्न मैथिलीम् ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सुगलोऽथ च राम-लक्ष्मणौ
प्रभविष्यन्ति रुषातलोपमाः ।
वयमत्र तदग्निना किल
भवितास्मः श्व इहैव भस्मसात् ॥४५॥

पुलिनं कपि-भल्लु-सङ्कुलम्
प्ररुरोदाप्युदधेर्विशङ्कटम् ।
अत एव समुद्र-वार्यभूत्
नितरां लावणिकं किमद्भुतम् ॥४६॥

उदधेर्निकषा तटं स्थितः
स च गृध्रस्तु दरीमुखस्थितः ।
श्रुतवानखिलं तदीरितम्
स्थविरस्तत्र विहीन-पक्षकः ॥४७॥

निजगाद तदा हितं वचः
किल सम्पातिरितीह विश्रुतः ।
कपि-भल्लुक-यूथपाः समे
श्रुतवन्तो हनुमन्मुखा अथ ॥४८॥

श्रृणुतात्र समे हि मैथिली
दशकण्ठापहृता रथ-स्थिता ।
उदधिं प्रविलङ्घ्य सिंहलम्
रुदती सा नितरामितो गता ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

शत-योजन-विस्तृतं किल
पुरतः पश्यत सागरं स्थितम् ।
यदिहास्ति विलङ्घनक्षमः
स किल द्रक्ष्यति तत्र मैथिलीम् ॥५०॥

अवगम्य तदीरितं वचः
समजो वानर-भल्लु-संयुतः ।
मुदमाप ततोऽब्धिलङ्घने
क्षमतावान् क इति व्यचिन्तयत् ॥५१॥

नल-नील-सुषेण-जाम्बवत्-
प्रमुखास्ते गण-नायकास्तदा ।
जलधि-प्रविलङ्घनेऽक्षमाः
न्यवसँस्तत्र विखिन्न-मानसाः ॥५२॥

श्रुतवानखिलं स मारुतिः
न विवेद स्व-बलं परं स्वयम् ।
निकषा समवाप्य जाम्बवान्
मुहुरेवं तमबोधयत् भृशम् ॥५३॥

तव केशरिनन्दनस्य च
कथमित्थं मलिनायते मुखम् ।
किमु न स्मरसि स्व-पौरुषम्
ग्रसितुं सूर्यमभूः पुरोद्यतः ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वकरेण विमर्द्दितं पुरा
स्मर राहुं रविमत्तुमुद्यतम् ।
स तवैव भिया पलायितः
शरणं प्राप शचीपतेस्ततः ॥५५॥

अथ यत्र तु काननं स्थितम्
सहसोत्पाट्य ततोऽन्यतः कृतम् ।
नगरं करयोर्धृतं क्वचित्
विनिमय्य प्रसभं तु रक्षितम् ॥५६॥

अथ वारिधिरत्र मारुते ?
जल-कुल्यासदृशं भवत्कृते ।
सलिलं प्रविलङ्घ्य लीलया
कृपया पाहि विधेहि नः शिवम् ॥५७॥

अयि ? मित्र ? समुद्र-लङ्घने
क्षम एकस्त्वमिहासि नान्यकः ।
स्मर वायुसुत ? स्व-विक्रमम्
जलधिं सन्तर याहि निर्भयम् ॥५८॥

राघवस्य पुरतो कपिर्गतः
प्रोच्य वृत्तमखिलं जगाद ह
दीयतां किमपि चिह्नमत्र मे
प्राप्य रावण पुरीं समर्प्यते ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नोदितोऽसौ जाम्बवता राघवस्याङ्गुलीयकम् ।
धृत्वाभिज्ञानरूपं तत् सज्जोऽभूदञ्जना-सुतः ॥६०॥

श्रुत्वा जाम्बवतो वचः स निखिलं स्मृत्वा निजं पौरुषम्
कृत्वा स्वं वपुरद्रि-सन्निभमहो गोप्त्वा पुनर्मुद्रिकाम् ।
गर्जन्नेव स-शैल-कानन-नदीं पृथ्वीं भृशं कम्पयन्
सीतां मार्गयितुं निधाय स गदां स्कन्धे हनूमान् बभौ ॥६१॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये नवमः सर्ग ईरितः ॥६२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दशमः सर्गः

(भुजङ्गप्रयातच्छन्दः)

नलो नील-मैन्दौ सुषेणो गवाक्षो
मयन्दोऽङ्गदो जाम्बवान् कातराक्षः।
समेषां पुरस्तात् हनूमान् जगर्ज
मम श्रूयतां सद्-वचो मित्रवर्ग ? ॥१॥

इतः सिंहलार्थं प्रतिष्ठेऽहमद्य
सलीलं सवेगं समुद्रं विलङ्घ्य।
समन्विष्य सीतां तदङ्घ्रौ निपत्य
ततो मुद्रिकां सप्रणामं निवेद्य ॥२॥

कथां सव्यथां राघवीयां निगद्य
तथा विघ्नदान् राक्षसान् सन्निषूद्य।
गृहीतप्रमाणोऽथ लब्धाभ्यनुज्ञ-
स्ततश्चागमिष्याम्यहं विद्धि सद्यः ॥३॥

न मामन्यथा शक्नुयात् कोऽपि लब्धुम्।
कथामात्र-शेषो भवेयं हि वक्तुम्।
निमज्ज्याब्धि-मध्ये शरीरं स्वकीयम्
विलीनं करिष्ये प्रतिज्ञा ममेयम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्मरँश्चाञ्जनामञ्जनाजानिमेवम्
तथा चेतसा राघवेन्द्रं प्रणम्य ।
गदामुद्यमन् प्रस्थितश्चैकतानः
पतत्त्रिर्यथा बाहु-पक्षौ ततान ॥५॥

महेन्द्राद्रि-शृङ्गोपरिष्टात् कपीन्द्रो
ह्यहो अद्रिकूटोर्ध्वगोऽन्योऽद्रिकूटः ।
गरुत्मत्सदृक्षो मरुत्पुत्र एष
बृहत् खेचरो दृश्यते खे चरन् सः ॥६॥

विदूरं प्लुतोऽसौ प्लवङ्गस्ततश्च
गिरिं तत्र मैनाकमेकं ददर्श ।
पुरस्तात् समायान्तमेनं प्रणम्य
स बद्धाञ्जलिर्वाचमेवं जगाद- ॥७॥

पुरा पर्वताः पक्षयुक्ता बभूवुः
पतत्त्राणि तेषां मरुत्वाँश्चकर्त ।
पिता ते मरुत् स्नेहयैवं निगूह्य
शचीशात् ततो मां समुद्रे जुगोप ॥८॥

इह स्थीयतां मारुते विश्रमाय
सहर्षं ततो गम्यतां सिंहलाय ।
फलं गृह्यतां पीयतां शीत-वारि
चिरं रक्षतात् सर्वदा त्वां स्मरारि : ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो अत्र मैनाक-शैलोऽसि धन्यः
भवेत् को मदर्थं सहायस्त्वदन्यः ।
हितो राघवस्येह सम्पादनीयः
मयैकः क्षणश्चापि न क्षेपणीयः ॥१०॥

इतो याम्यहं स्वामिकार्यं विधाय
परावृत्य वत्स्यामि शैल ? क्षणाय
प्रसन्नो विनम्रः स मैनाक ऊचे
हनूमन् सदैवास्तु पन्थाः शुभस्ते ॥११॥

परिष्वज्य मैनाकमेवं हनूमान्
प्रतस्थे ततः किञ्चिदग्रे स धीमान् ।
तदा राक्षसीं निर्घृणां कृष्ण-वर्णाम्
सुरस्येति नाम्नीं कपिः सन्ददर्श ॥१२॥

कराला जटाला विशाला तथोग्रा
मुखं व्याददाना तथा तीक्ष्ण-दंष्ट्रा ।
क्षमोऽयं न वेत्येव जिज्ञासमाना
पुरस्तस्य सा नागमाता जगाम ॥१३॥

तदा साब्रवीद् विद्ध्यहं देवताभि-
र्बुभुक्षाकुला चात्र नैकैरहोभिः ।
व्रतं धारयन्त्यस्म्यतः पारणार्थम्
प्रदिष्टाद्य दिष्टया त्वमत्रागतोऽसि ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अवोचत् कपिः प्रेषिता दैवतैस्त्वं
मयाज्ञायि सर्वं रहस्यं त्वदुक्तम्।
परं राम-कार्यं विधायैव सद्यः
प्रसादाय तेऽत्रागमिष्यामि मातः?॥१५॥

निरुद्ध्याथ मार्गं पुरो मारुतेः सा
स्थिता प्रार्थनामप्यवज्ञाय दुष्टा।
कपिस्तां ततो भक्ष मामित्युवाच
बृहत् दर्शयन् स्वं वपुः संननाद॥१६॥

हनूमाँस्तु प्राज्ञः समस्ताश्च विद्याः
सकाशाद् गुरोः पूर्वमेवोपलब्धाः।
अभूवन् यतः सिद्धयोऽष्टौ च तस्य
पुरः सेविका-सन्निभाः प्रभ्रमन्त्यः॥१७॥

प्रयुज्याञ्जनेयः स्वकां सिद्धि शक्तिं
वपुष्मान् यदा दीर्घरूपो बभूव।
सुरस्या च सद्यः स्वशक्तेः प्रयोगात्
उदग्रा तदग्रे भृशं सा जहास॥१८॥

अभूत् सातिदीर्घ मुखं व्याददाना
वपुः स्वं महत् प्रव्यधात् मारुतिश्च।
प्रति-स्पर्धितायाः क्रमो वर्धते स्म
महीधाकृतिर्मारुतिर्वर्तते स्म॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बृहद् गह्वराकारमास्यं दधाना
सुरस्याभवत् मारुतिं भोक्तुकामा।
प्लवङ्गो लघिष्ठां स्वसिद्धिं प्रयुज्य
द्रुतं निर्ययौ तन्मुखं संप्रविश्य ॥२०॥

विहस्यैव तामाञ्जनेयो ननाम
प्रविश्याननं निसृतोऽहं,–बभाण।
न कार्यात्र चिन्ता पुनः पारणाय
द्रुतं देह्यनुज्ञामितः सिंहलाय ॥२१॥

अयं वानरो वानरः केवलं न
परं शक्तिमान् देवरूपोऽवतीर्णः।
अतो रामकार्यं विधातुं क्षमं तं
व्यजानात् तदा नागमाता कपीन्द्रम् ॥२२॥

अथान्यापि मार्गे स्थिता राक्षसी या
प्रसिद्धा च नाम्ना श्रुता सिंहिकेति।
नरं वानरं वा खगं किन्नरं वा
गृहीत्वैव बिम्बं निपात्यैवमत्ति ॥२३॥

कपिं छायया तं यदा सा चकर्ष
स नीचैर्गतो वेगतश्चातिरुष्टः।
बलीयान् स्वमुष्ट्या भृशं तां जघान
जगामाञ्जनेयोऽथ पौलस्त्य–धाम ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हनूमानहो पक्षवान् पर्वतः किम्
बृहत्काय एवं गरुत्मान् खगो नु ।
स कालः करालोऽथवा चान्तकारी
शिवो वाधुना दृश्यतेऽसौ स्मरारिः ॥२५॥

स्वमार्गेऽभ्युपेताः समग्राश्च विघ्नाः
प्लवङ्गस्य शक्त्या तदानीं हि भग्नाः ।
सवेगं सलीलं पयोधिं विलङ्घ्य
स दृष्ट्वैव लङ्कां प्रहृष्टो जगर्ज ॥२६॥

स्वकीयं तु संक्षिप्य देहं सचेष्टः
स यावद्दिनं यत्र तत्र भ्रमँश्च ।
दिवा सिंहलं तं समग्रं ददर्श
निशायां ततो राज-सौधं प्रविष्टः ॥२७॥

पुरो रक्षणे रावणेन प्रयुक्तम्
प्रकाशं किरँश्चाभितः प्रभ्रमन्तम् ।
तदा चान्तरिक्षे भ-वृन्दैरुपेतम्
स साश्चर्यमेवं तमिन्दुं ददर्श ॥२८॥

सरः पुष्करं नाम यच्चान्तरिक्षे
प्रफुल्लं न्वहो कान्तिमच्चेन्दु-पुष्पम् ।
तथेन्दीवरैरर्ध-फुल्लैर्वृतं सत्
कुमुद्वन् मनोज्ञं भृशं तद् विभाति ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

निशा किञ्च वासांसि कक्षे निधाय
गता पुष्करं कल्मष-क्षालनाय।
अघर्षीत् भृशं सा तदा फेनिलेन्दुं
भ-वृन्दं बभौ फेन-बिन्दुस्वरुपम् ॥३०॥

यमो गोपुर-द्वारपस्तत्र दृष्टः
सुरास्ते तदीयानुदेशं वहन्ति।
विनाज्ञां स्वतः स्पन्दते नैव पत्रम्
सुरक्षा दृढा वर्तते तत्र चित्रम् ॥३१॥

बुभुक्षा पिपासा व्यथा रोग-चिन्ता
दशास्यस्य पुर्यां तु कारागृहस्थाः।
सदा चाशुतोषस्य भक्तो दशास्यः
विलासी स्थितः कष्टजातं व्यपास्य ॥३२॥

कपिश्चाथ सौधं गतो रावणस्य
प्रकोष्ठाँस्तथैकैकशः सम्प्रविष्टः।
स मन्दोदरीं दृष्टवान् राघवस्य
न सीतां दशास्येन नीतां ददर्श ॥३३॥

वियोगेन सीता विलीना क्वचिद् वा
निमग्ना सशोका समुद्रं गता वा।
पिबन्ती विषं नाम-शेषं स्थिता वा
कुतो मैथिली मेऽक्षिमार्गं न याता ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रियामा सकामेन्दुमालिङ्गयन्ती
सहैवेह याम-त्रयं यापयन्ती ।
अतृप्ता परं सा ह्रियैवं विभाते
दरीं यातुकामा दरीदृश्यते नु ॥३५॥

क्षपा नाथसार्धं क्षणानि क्षिपन्ती
यथेच्छं मुहुर्ग्राम्यधर्मं वहन्ती ।
मुमोचातिवेलं किमु स्वेद-जालं
पृथिव्यां बभौ पुष्करं शुक्तिमालम् ॥३६

व्यतीते तु याम-त्रयेऽस्मिँस्तुरीये
हनूमान् हरेर्नाम शुश्राव तत्र ।
हृदं तर्पयन् श्रोत्र-पेयं पिबन् स
विचङ्क्रम्य पादौ नरीनृत्यति स्म ॥३७॥

समाजस्त्वसौ राक्षसानामथापि
कथं श्रूयते नाम विष्णोरिहापि ।
इयं किन्तु मायाविनामस्ति माया
यतः कल्पनायां न चासीन्ममापि ॥३८॥

ततो यद् भवेत् तद् भवेन्नास्ति चिन्ता
वदन्नेव रामध्वनेश्चानुगन्ता ।
कुटीरं हनूमान् तदा प्राप यत्र
भजन्तं हरिं दृष्टवान् कञ्च तत्र ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तनौ धौतवस्त्रोपवीते निधाय
 ललाटे तथैवोर्ध्व-पुण्ड्रं विधाय ।
स्मरन्तं हरिं सज्जनं मन्यमानः
 कपिस्तं गदामाददानो ननाम ॥४०॥

दशास्यानुजो विष्णुभक्तः स चासीत्
 अतस्तं कपिं राम-दूतं त्वबोधीत् ।
सुलभ्योपचारैर्नमस्यां विधाय
 क्षणं तेन सार्धं लपित्वा निनाय ॥४१॥

कपिः पृष्टवान् जानकीयं निवासम्
 प्रतिज्ञातवान् राक्षसानां विनाशम् ।
ततो ज्ञातवान् दुःस्थिता यत्र सीता
 ह्यशोकाभिधां वाटिकाञ्चातिरम्याम् ॥४२॥

अधस्तादशोकं क्षितौ विस्तृतेषु
 ददर्शाथ सीतां निषण्णां कुथेषु ।
विषण्णो हनूमान् तदाभूत् सशोकः
 ह्यशोकेति वृक्षं मुधा वक्ति लोकः ॥४३॥

स शाखामृगः शाखि-शाखां प्रविश्य
 लघूकृत्य देहं ततः स्वं निगूह्य ।
कुतः कः कथं किं करोतीति कृत्वा
 स्थितोऽभूत् चतुर्दिक्षु दृष्टिञ्च दत्वा ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal.

CC-0. Digitized by eGangotri and MIDF- Delhi

ततो रक्षकै राक्षसैश्चानुयातः
सपद्येव तत्रागतोऽभूत् दशास्यः ।
वराकीं तु सीतां स्थितां चातिभीताम्
वियोग व्यथा-व्याकुलां तामुवाच ॥४५॥

"मृगं काञ्चनं लिप्सुमेवं विमूढम्
न जानाति यो नीति-तत्त्वं निगूढं ।
नरोऽपि स्वयं वानरैः सार्धमेवं
चरन्तं पशुं तं स्मरस्यत्र चित्रम् ॥४६॥

प्रजारक्षणस्येह दूरेऽस्तु वार्त्ता
प्रियारक्षणेऽप्यक्षमः पामरः सः ।
परित्यज्य राज्यं वनेषु भ्रमन्तं
तथा कातरं त्वं स्मरस्यत्र चित्रम् ॥४७॥

त्रिलोकी-पतिं मां प्रिये त्वं भजस्व
त्रिलोकस्य सौख्यञ्च मत्तो लभस्व ।
अरण्येचरं त्वत्पतिं जीवयिष्ये
ततः सानुजं तं भरण्यं प्रदाय ॥४८॥

अथो मैथिली कातरा कन्दलीव
रुषा साग्निवर्णा तपन्ती तदैव
अशक्ता विसोढुं मुहुर्भर्त्सयन्ती
पुरःस्थं दशास्यं तमेवं जगाद ॥४९॥

Jayatu Sanskritam; Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"रतो गर्हिते नश्वरे वस्तुनि त्वम्
विजानाम्यहं कीदृशो वर्तसे त्वम् ।
छलिन् ? चौरवत् मां बलाददादानः
स्थितोऽसि स्वकं पौरुषं मन्यमानः ॥५०॥

अरे दुष्ट राम-प्रतापं न वेत्सि
महान्तं दयालुं क्षमं तं तु विद्धि ।
झटित्येव मां त्वं तदग्रे समर्प्य
प्रणाशात् स्वकीयं कुलं स्वञ्च रक्ष ॥५१॥"

ततो रावणः सीतयोक्तं निशम्य
जगर्जाट्टहासं पुरः सोपगम्य ।
भयं दर्शयँश्चातिवेलं ननाद
पुनर्मैथिलीं तर्जयन् तां जगाद ॥५२॥

"शृणुष्वाद्य मासावधिं ते ददामि
भव त्वं ममेत्येव भूयो वदामि ।
न चेत् मन्यसे राक्षसास्ते शरीरं
तदा भक्ष्ययिष्यन्ति मत्वा सुभोज्यम् ॥५३॥"

गतो रावणो मैथिलीमेवमुक्त्वा
मनो मारुतेर्विव्यथे तां च दृष्ट्वा ।
स रामाङ्गुली-भूषणं वृक्षमध्यात्
द्रुतं पातयामास तस्याः पुरस्तात् ॥५४

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहो स्वामिनो भूषणं रत्नदीप्तम्
विवाहे तु तस्मै मयैव प्रदत्तम् ।
वदन्ती करेणाग्रहीत् भूमिलग्नम्
शशङ्के कथं वै विदूरादुपेतम् ॥५५॥

अथेदन्तु मायाविना रावणेन
कृतं मायिकं जातु कृत्यं शठेन ।
भिया भूषणं तच्च भूमौ निधाय
स्थिता भूमिजा त्रस्तचित्ता क्षणाय ॥५६॥

सशोकामशोकस्य वेद्यां निषण्णाम्
वरेण्यां धरण्याः सुतां तां विषण्णाम् ।
स शाखामृगः स्कन्ध–शाखोपविष्टः
समाश्वासयन्नेवमूचे लघिष्ठः ॥५७॥

अहं केशरी–नन्दनश्चाञ्जनेयः
सदा दास–दासोऽस्म्यहं राघवस्य ।
प्रणामं मदीयन्त्वितः स्वीकुरुष्व
ब्रवीम्यद्य ते प्रत्ययार्थं श्रृणुष्व– ॥५८॥

"उदीच्यामितस्तत्र तीरे सरय्वा
रघूणां स्थिता राजधानी त्वयोध्या ।
पितुर्भूपतेराज्ञया द्वौ कुमारौ
प्रविष्टौ वनं दण्डकारण्यमाप्तौ ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तयो राम-नामा कुमारो वरिष्ठः
पुनर्लक्ष्मणश्चानुजोऽभूत् बलिष्ठः ।
हृता त्वेकदा रामपत्नी तु सीता
विधायच्छलं रावणेनाविगीता ॥६०॥

उभौ मार्गमाणौ सरित्काननेषु
तपः साधकानां च पर्णोटजेषु ।
गिरीणाञ्च शृङ्गेष्वथो कन्दरेषु
भ्रमन्तावभूतां युवानौ धृतेषू ॥६१॥

अरोदीत् स रामः स्मरन्नात्मजायाम्
विलप्य स्थितो लक्ष्मणो भ्रातृजायाम् ।
मृगाणां च सङ्घे मुनीनां सभायाम्
उभावन्विषन्तावभूतां धरायाम् ॥६२॥

अभूत् मैथिली दिव्य-सौन्दर्य-धाम
भवेत् सा गता केन वा कुत्र नाम ।
विना सीतया चार्ध एवास्ति रामो
न शोकस्य कुत्रापि पूर्णो विरामः ॥६३॥

फलैः कन्द-मूलैः सरोभिः समृद्धः
कुरङ्गप्लवङ्गाच्छभल्लैः प्रवृद्धः ।
बृहन् ऋष्यमूकाभिधः शैलशृङ्गः
स्थितो यत्र सुग्रीवनामा प्लवङ्गः ॥६४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रुमा-नामिका तस्य जाया तु याभूत्
हृता बालिना चाग्रजेनैव साभूत् ।
यदा राम-सुग्रीवयोर्मित्रताभूत्
हतो राघवेणैव बाली तदाभूत् ॥६५॥

मया चापि सुग्रीव-साचिव्यमाप्तम्
तथा राघवेन्द्रस्य कारुण्यमाप्तम् ।
उभाभ्यामहं प्रेषितश्चागतोऽस्मि
प्रणामं मम स्वीकुरुष्वानतोऽस्मि ॥६६॥

अथादिश्यतां किङ्करोऽस्म्यत्र मातः
न दुःखं तवातः परं विद्धि चात्र ।
सगोत्रं मया रावणो दुष्ट-रक्षो
यम-द्वारि नेतुं क्षणेनैव शक्यः ॥६७॥

परं रामदूतोऽस्म्यलब्धाभ्यनुज्ञः
क्षमोऽप्यक्षमोऽस्म्यत्र विज्ञोऽनभिज्ञः ।
इतस्तेऽद्य सन्देशमात्रं नयामि
स्वयं राघवं क्षिप्रमत्रानयामि ॥६८॥

विदेहस्य पुत्री च रामस्य भार्या
स्वयं वर्तसे कापि चिन्ता न कार्या ।
मदुक्तेह वाणी भवत्यावधार्या
द्रुतं त्यक्ष्यसे रक्षसां भूरनार्या ॥६९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अब्धेः सन्तरणं कपिस्तु कृतवानेवं सलीलं ततो
मध्ये मार्गमुपस्थिता च सुरसा तस्या मुखान्निर्गतः ।
पारे तीरमगात् तनुं च स तनूकृत्य स्वकीयं निशि
पौलस्त्यस्य पुरं प्रविश्य प्रथमं सौधं गतो मारुतिः ॥७०॥

प्रासादेऽपि न दृष्टवान् रघुपतेः पत्नीं हनूमाँस्ततः
प्राप्यैवं हि विभीषणस्य स कुटीं संलप्य किञ्चित् स्थितः ।
गत्वा शिंशप-वाटिकामथ कपिः संदृष्टवान् मैथिलीम्
नत्वा तां च सभक्ति मारुत-सुतोऽगादीत् स्वकं संस्तवम् ॥७१॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये दशमः सर्ग ईरितः ॥७२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकादश सर्गः

(भुजङ्गप्रयातच्छन्दः)

निशम्यैव वाणीं कपेः कर्ण-पेयाम्
मुदा संबभौ मन्यमानातिधन्याम् ।
अवोचत् ततो मैथिली द्रष्टुकामा
वदन्तं कपिं सोत्सुका राम-रामा ॥१॥

"कुतस्त्वं करोष्यत्र रामस्य चर्चाम्
प्रसीदामि संश्रुत्य वार्तां मनोज्ञाम् ।
ममाग्रे त्वमागच्छ सन्देशहारिन्
वपुर्दर्शय स्वं मनोह्लादकारिन् ॥२॥"

अशोकात् तरोर्मारुतिः सोऽवरुह्य
विशोकामथो जानकीं तां प्रणम्य ।
स्थितश्चाग्रतः साञ्जलिर्ह्रस्व-रूपः
स तामञ्जनासन्निभां सन्ददर्श ॥३॥

अपश्यत् यदा मैथिली रश्मिलोमं
कपिं बालसूर्योपमं काञ्चनाङ्गम् ।
विनष्टं तदैवान्तरं शोकजातम्
तमिस्रा कथं यत्र भाति प्रभातम् ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सलील समुद्रं समुल्लङ्घ्य चेह
　　पुरीं सिंहलामागमञ्चाञ्जसैव ।
पुनर्मैथिलीमप्यहं दृष्टवाँश्च
　　परं पौरुषं कोऽपि नो वेत्ति मेऽत्र ॥५॥

किमप्यद्भुतं कर्म कुर्वन् हि दुष्टान्
　　निहत्याखिलान् राक्षसान् सम्मुखीनान् ।
दशास्यं विलोक्यैव वार्त्तां विधाय
　　गमिष्यामि पारेसमुद्रं गृहाय ॥६॥

वुभुक्षान्वितोऽस्मीति सीतां वदामि
　　ततो वाटिकाभ्यन्तरेऽहं विशामि ।
निरोत्स्यन्ति मार्गं भटा मे यदैव
　　स्वकं विक्रमं दर्शयिष्ये तदैव ॥७॥

विधेयो हनूमानुभाभ्यां कराभ्यां
　　स तस्यै ददौ मुद्रिकां राघवीयाम् ।
तदा जानकी सा बभूव प्रहृष्टा
　　ददावाशिषश्चाञ्जनेयाय तुष्टा ॥८॥

"कथं राघवो वर्ततेऽरण्यकेषु
　　कथं लक्ष्मणः सेवते तं धृतेषुः ।
स्मरत्यप्यथो मां विपन्नामनाथां
　　करिष्यत्युपेत्यात्र किं मां सनाथाम् ॥९॥"

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

उभौ चक्रतुस्तत्र वार्तां मनोज्ञाम्
व्यजानात् स्थितिं मैथिली राघवीयाम् ।
वुभुक्षाकुलोऽस्मिति सव्याजमेवं
क्षुधा बाधतेऽम्बेति सीतामुवाच ॥१०॥

"इतो दृश्यते वाटिकेयं फलाढ्या
ततः शोभते रम्य-कुल्या जलाढ्या ।
अहं वानरस्तत्र गत्वोत्पतिष्णुः
स्वयं भोक्तुकामः फलानां हि गृध्नुः ॥११॥"

"कपे वत्स ते ह्रस्वरूपं चकास्ति
गणो रक्षसां भीमकायस्त्विहास्ति ।
मनः खिद्यते मे विचार्यैव यस्मात्
कथं शक्नुया गोपितुं स्वं बलिष्ठात् ॥१२॥"

स सीतोक्तमेवं विदित्वा हनूमान्
अभूत् तत्क्षणं मेरुतुल्यः प्रभावान् ।
करालो महाकालरूपो जगर्ज
अहो सिंहल-द्वीपमात्रं ततर्ज ॥१३॥

"हनूमन्नहं वीक्ष्य जातास्मि धन्या
तव प्रीतिरस्त्येव स्वामिन्यनन्या ।
नरो वानरश्चोभयोः सख्य-लाभः
क्षितौ कीर्त्यते विश्व-बन्धुत्वभावः ॥१४॥"

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्वरूपं यथापूर्वमेवं विधाय
हनुमानथो वाटिकान्तस्त्वियाय ।
फलं चापि भुक्तं प्रशाखाश्च भुग्नाः
कपिं वीक्ष्य रुष्टा दशास्यस्य निघ्नाः ॥१५॥

भृशं ताडिता रक्षका वाटिकायाः
दशास्यान्तिकं प्रोचुरेवं प्रयाताः ।
कुतश्चित् कपिश्चागतोऽब्धिं विलङ्घ्य
अशोकां व्यधात् शोकदां तां विभज्य ॥१६॥

चरोक्तं समाकर्ण्य रुष्टो दशास्यः
कनिष्ठं सुतं चादिशत् लोहिताक्षः ।
समादाय सैन्यं द्रुतं याहि वत्स
प्लवङ्गाधमं तीव्र-दण्डं प्रयच्छ ॥१७॥

कुमारोऽक्षयस्तत्र योद्धुं जगाम
स-सैन्यं प्लवङ्गो रणे तं जघान ।
अशोकस्य विध्वंसिनो विक्रमं तत्
कपिः सिंहले शोक-सिन्धुं ततान ॥१८॥

कनिष्ठस्य सूनोः स शुश्राव मृत्युम्
दशास्योऽसमर्थः स्वरोषं निरोद्धुम् ।
सतं ज्येष्ठमाज्ञप्तवान् मेघनादम्
ययौ सोऽपि योद्धुं चमूभिः सनाथम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

समुत्पाट्य वृक्षान् भटान् सञ्जघान
प्रबद्धं स नैकान् स्वपुच्छं ततान ।
कराभ्यां तथा चापरान् घूर्णयित्वा
कपिः प्राक्षिपत् तान् परेतान् विदित्वा ॥२०॥

प्लवङ्गस्तदा यातवान् मेघनादम्
स्वमुष्ट्या दृढं प्राहरत् तं सनादम् ।
स मूर्च्छां गतस्तत्र भूमौ पपात
प्रहृष्टः कपिस्तत्र घोरं जहास ॥२१॥

क्षणादेव निष्कश्मलश्चोत्थितोऽभूत्
स्वमायां वितन्वँस्तदा मायिकोऽभूत् ।
हनूमान् प्रतार्याचिरं चेन्द्रजालम्
ततोऽदर्शयत् स्वं शरीरं विशालम् ॥२२॥

दशास्यस्य पुत्रो बभूवातिरुष्टः
यतो ब्राह्ममस्त्रं प्रयुङ्क्ते स्म सद्यः ।
कपिर्मूर्च्छनव्याजतोऽभूत् विचेष्ट
स्तदानीमभूत् मेघनादः प्रहृष्टः ॥२३॥

कपिं मूर्च्छितं मेघनादः स मत्वा
पुनस्तं दृढं नाग-पाशेन बद्ध्वा ।
प्रतस्थे समादाय राज्ञः सभायां
अहो को नु जानाति दैवस्य मायाम् ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चमूपैस्ततः संवृतोऽसौ हनूमान्
इदं दूत-कर्मेति बुद्धवैव धीमान् ।
दशास्यं तदा भूपतेरासनस्थं
स बद्धाञ्जलिः संस्थितोऽभूत् नमँस्तम् ॥२५॥

ततो रावणस्याज्ञया सद्य एव
कपिर्मोचितो नागपाशाच्च तत्र ।
बहिः स स्मितोऽन्तर्विभीतो दशास्यः
स्वकं संस्तवं ब्रूहि -कीशं जगाद ॥२६॥

अवोचत् स रामस्य दूतोऽस्मि यस्य
हृता जानकी या त्वयैवं प्रसह्य ।
वरं राघवायाधुना तां प्रयच्छ
कथा-शेषतामन्यथा यासि सद्यः ॥२७॥

ततो रावणश्चातिरुष्टो बभूव
हतेति स्वकीयान् भटानादिदेश ।
यदा शस्त्रिणो हन्तुकामा बभूवु-
स्तदा नोचितञ्चेति सभ्यास्तमूचुः ॥२८॥

प्लवङ्गास्तु लाङ्गूलके दर्पदृप्ताः
अतस्तैलपृक्तेन चैलेन बद्ध्वा
पुनश्चैकतो वन्हिना योजयित्वा
जहीहीत्यवोचत् पुरं भ्रामयित्वा ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

यथोक्तं दशास्येन कृत्वा तथैव
कपेर्बालधिं वह्निनैवं प्रदाह्य ।
भटा मारुतिं तं पुरोऽन्ते विसृज्य
सभामागताः साट्टहासं विहस्य ॥३०॥

इतः प्लुष्ट-पुच्छो हनूमान् यदाभूत्
स्मरन् पार्वतीं पार्वतीपं तदाभूत् ।
नमँश्चेतसा भक्तियुक्तेन देवम्
स तुष्टाव वेदोक्तरीत्या तदैवम् ॥३१॥

"आशु तुष्यसि यतो जनैः प्रभो ?
ह्याशुतोष इति गीयसेऽखिलैः ।
ईश्वरोऽस्यथ महानतो भवन्
कीर्त्यसे भुवि महेश्वरेति च ॥३२॥

शम्भवाय च मयोभवाय च
शङ्कराय च मयस्कराय च ।
हं हराय जगदीश्वराय च
शं शिवाय भवते नमो नमः ॥३३॥

त्र्यम्बकं च शिवदं भजाम्यहम्
पुष्टिदं सपदि संस्मराम्यहम् ।
त्राहि मां गिरिश ? दाहकष्टतो
शीतलं समभिषिच्य पाहि माम् ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्लवङ्गस्ततो दग्ध-पुच्छं विलोक्य
दयार्द्रस्तदा चाशुतोषो बभूव ।
पुनर्मैथिलीयामवस्थां विभाव्य
शिवो रौद्ररूपो मनस्येवमाह ॥३५॥

विधिस्थानिकं कस्यचित्कल्मषं चेत्
प्रसाद्याथ विष्णुं प्रणाशं तदेति ।
हरिस्थानिकश्चापराधस्तथैव
शिवं तोषयित्वा शमत्वं प्रयाति ॥३६॥

शिवस्थानिकस्यापराधस्य लोके
शमो नास्ति कुत्राप्यसौ भोग्य एव ।
त्वमत्युग्रदर्पेण जातः किलान्धः
कृतं दुष्कृतं तत्फलं भुङ्क्ष्व सद्यः ॥३७॥

अरे रावण त्वं कपिं नैव वेत्सि
त्वमेनं ममैवांशरूपं तु विद्धि
शिव-स्थानिकोऽसौ त्वदीयोऽपराधो
विघाताय ते जीवितस्यैव जातः ॥३८॥

त्रिलोक्यां हि नार्यस्तु सर्वत्र पूज्या
स्त्वदीये कथं सिहले तत्र भोग्याः ।
इदं गर्हितं नैव शक्नोमि सोढुं
त्वमेतेन दुष्कर्मणा यासि मृत्युम् ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुनर्मारुतिं तं ख-वाण्या बभाण
"त्वया सिंहलोऽस्त्वद्य दन्दह्यमानः ।
प्रसन्नोऽस्मि त्वत्तः कपे नैष वह्नि-
र्नवज्राङ्ग तेऽङ्गं प्रदग्धुं क्षमोऽस्ति ॥४०॥"

हनूमानभूत् तत्क्षणं भीम-कायो
भ्रमँश्चाभितः सिहलं सन्ददाह ।
वि-पूर्वस्य वै केवलं भीषणस्य
निषिच्यौषधं तस्य गेहं ररक्ष ॥४१॥

दशास्यस्य भीत्या पृथिव्यां निरुद्धा
विलुप्ताः पुरा यज्ञ-यागादिकास्ताः ।
बभौ स्वाहयैवानुयातोऽग्निदेवः
क्षुधार्तोऽखिलं सिंहलं भक्षतीव ॥४२॥

वराको यमः किञ्च कारानिबद्धः
तदग्नेः प्रभावाच्च जातो विमुक्तः ।
बुभुक्षाकुलोऽसौ न्यगालीद् यथेष्टम्
यतो ह्युत्सृजत् सोऽभितो भस्मपुञ्जम् ॥४३॥

निमज्य स्वपुच्छं जले चार्णवस्य
तदोर्ध्वं शिलायां कपिः सन्निविष्टः ।
शरीरात् स्रुता सैन्धवी स्वेदधारा
समुद्रे स्खलत् स्वर्णलोम्नोध्वनैव ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स मोमुह्यमानोऽभितो दत्तदृष्टिः
प्रदन्दह्यमानां तु लङ्कां ददर्श ।
स्वसाफल्यमेवं च बोबुध्यमानः
शिलामञ्चकेऽबोभवीत् कूर्दमानः ॥४५॥

अथो मारुतिर्जानकीं द्रष्टुकामः
परावृत्य भूयोऽपि सीतां ननाम ।
तमूचे-चिरञ्जीव भक्तिं लभस्व
सदा लोक-कल्याण-हेतोर्यतस्व ॥४६॥

विपन्ना कपे अत्र पत्युः प्रपन्ना
रुदत्यस्मि शोकाब्धिमध्ये निमग्ना ।
इहागत्य दुष्टान् विनष्टान् विधाय
ह्यनाथां सनाथीकरोत्वत्र नाथः ॥४७॥

पुनः साश्रुपूर्णे स्वनेत्रे विधाय
प्रदाय स्व-चूडामणिं सा जगाद ।
इदं भूषणं त्वं समादाय गच्छ
समं वृत्तमावेद्य तस्मै प्रयच्छ ॥४८॥

यथा वेगवत्योऽर्णवं यान्ति नद्यो
महावायुरेवं प्रवाति प्रकम्प्य ।
गरुत्मान् यथोड्डीयते खे सवेगं
प्रयातं तव स्यात् भुजङ्गप्रयातम् ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहं जानकीं दृष्टवानत्र साक्षात्
इमां शिंशपा-वाटिकां ध्वस्तवाँश्च ।
मया सिंहलो भस्मसाद् प्रव्यधायि
न तत्रास्ति साक्षी तु मत्पौरुषस्य ॥५०॥

न चेहास्तिमत्सन्निभः कोपि वीरो
दशास्योऽप्यभूत् मां च पश्यन्नधीरः ।
कुमारोऽक्षयो हिंसितश्च क्षणेन
कथं ज्ञायतां तत्र कैष्किन्धकेन ॥५१॥

तदैव स्तुतश्चाञ्जनेयेन ब्रह्मा
दयालुः स्वयं प्राभवत् नाभिजन्मा ।
स्वकीयेमनस्युद्भवं तर्कजातं
बभाण प्लवङ्गो नमन् पद्मजातम् ॥५२॥

मया दर्शितं पौरुषं यत् स्वकीयम्
न कोऽप्यस्य साक्षी तु पारे समुद्रम् ।
विलिख्याखिलं पत्रकेऽत्रत्यवृत्तम्
प्रभो ? दीयतां प्राप्य ताञ्छ्रावयेऽहम् ॥५३॥

प्लवङ्गानुकूलं तु पत्रं ददानः
विधाताथ सृष्टेः स धाता जगाम
कपिश्चोन्मना द्रष्टुमात्मीय-बन्धून्
प्रसन्नः प्रतस्थे स पत्रं दधानः ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बहुभ्यो दिनेभ्योऽगृहीतान्नपानः
　　तृषार्तोऽतिवेलं जलं पातुकामः ।
तदैकं स पर्णोटजञ्चाजगाम
　　मुनिः कश्चिदासीत् कपिस्तं ननाम ॥५५॥

स विश्रब्धवाँस्तं मुनिं सद्य एव
　　स तं दृष्टवानाञ्जनेयः पितेव ।
पुरस्थस्तदा मारुतिर्भीमकायः
　　स्वकं संस्तवं विस्तृतं तञ्जगाद ॥५६॥

सरः पृष्टवान् पातुकामो जलं स
　　कृपालुर्मुनिर्वर्त्म निर्दिष्टवाँश्च ।
पुरस्तस्य चूडामणिं सन्निधाय
　　प्लवङ्गस्तु सद्यः प्रयातो जलाय ॥५७॥

जलं कण्ठदघ्नं स पीत्वाजगाम
　　मणिर्दीयतां याम्यहं तं बभाण ।
मुनिस्तूचिवान् कुण्डिकातो गृहाण
　　विचित्रं ददर्शाथ दृष्टिं ददानः ॥५८॥

चयं सोऽदृशत् तत्र चूडामणीनाम्-
　　अतो नाशकत् चेतुमेकं स्वकीयम् ।
असङ्ख्येयमित्थं कथं रत्नजातम्
　　अहो अद्भुतं भो मुने ? अत्र जातम् ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदोचे मुनिस्तं यथा वर्तसेऽद्य
प्लवङ्गास्त्वनेके पुराप्यागताश्च ।
तृषार्तैः समस्तैर्निधायात्र रत्नम्
त्वयेव द्रुतं ते प्रयाता जलार्थम् ॥६०॥

विभिन्नैर्दशास्यैरनेकाश्च सीता
हृताः सागरा लङ्घिता नैकवारम् ।
समस्तं त्विदं निर्विशेषं मदर्थम्
चिनु त्वं स्वयं मैथिली-प्रत्त-रत्नम् ॥६१॥

मुहुर्वानराः सिंहलाच्चाभ्युपेताः
सहस्राधिकास्त्वादृशा दृप्त-दर्पाः ।
न कस्याप्यभूत् सुस्थिरः स्वाभिमानो
ह्यखर्वञ्च खर्वायते गर्व-धाम ॥६२॥

मदंशः सदा राघवस्यानुयायी
न दर्पान्वितः स्यात् कदापीति शम्भुः ।
मुने रूपमादाय तस्थौ क्षणाय
ययौ मारुतिं दर्पहीनं विधाय ॥६३॥

स तत्त्वं ततो ज्ञातवानाञ्जनेयो
ह्यहंयुर्न चैवं भविष्यामि भूयः ।
पुरस्तस्य किञ्चिद् रहस्यं न चास्ति
यथापूर्विका सृष्टिरेषा चकास्ति ॥६४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तदिच्छां विना कम्पते नैव पत्रम्
जगत्यत्र यत्किञ्च सर्वं तदीयम् ।
वृथैवाभिमानं मनुष्यः करोति
अहन्ता-हृदे स्वं निमज्जन् दुनोति ॥६५॥

विहगपतिरसौ नु पक्ष-हस्तो
वियति सुवाति प्रकम्पनोऽत्र किञ्च ।
किमु भुजगपतिः सवेगमेति
न हि न हि मारुतिना विलङ्घ्यतेऽब्धिः ॥६६॥

जलधि-सलिलमञ्जसा सलीलं
द्रुत-गतिरत्र कपिर्विलङ्घ्य चेदम् ।
मन इव तरसैव सागरस्य
स तु सहसा समगात् तदन्य-तीरम् ॥६७॥

कृत-रघुवर-पाद-पद्म-भक्तिः
स्मित-मुख-सूचित-सर्वकार्य-सिद्धिः ।
कपिश-नयन एष वै कपीशो
दशवदनस्य च पत्तनादुपेतः ॥६८॥

विहग-पतिरिवाञ्जनेय-नामा
कपिरवरुह्य विहायसाप्तकामः ।
जलनिधि-पुलिने-प्रतीक्ष्यमाणान्
मलिन-मुखान् स ददर्श भल्लु-कीशान् ॥६९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

विदत-सकल-वृत्तं ज्ञातत्रत्यकृत्यं
समभवदथहृष्टं साऽङ्गदं सैन्य-वृन्दम्
अवगत-महिमानो भल्लुकाश्च प्लवङ्गाः
सजय-जय-निनादं प्रस्थिता ऋष्यमूकम् ॥७०॥

तीर्त्वा सागरमभ्युपेत्य नगरं दृष्ट्वा ततो मैथिलीं
हत्वा वर्त्मनिरोधकान् निशिचरान् दग्ध्वाखिलं सिंहलम् ।
सीताप्रत्तविभूषणं स कपिशोऽभिज्ञानरूपं तत-
श्चादायैव पुनर्विलङ्घ्य सलिलं रामाय रत्नं ददौ ॥७१॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने चैकादशः सर्गोऽत्र कीर्तितः ॥७२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

द्वादशः सर्गः

स्रग्विणीच्छन्दः

मारुतिर्वेगवानब्धितीरादथ
वानरैर्भल्लुकैः सैन्य-वृन्दैर्वृतः ।
ऋष्यमूकं गिरिं सिद्ध-कार्यो गतः
सानुजं राममेवं न्यवेदीत् ततः ॥१॥

"जानकी सिंहलेऽशोकवाटीं स्थिता
सन्ततं त्वद्वियोग-व्यथा-व्याकुला ।
राघवो नेतुमायास्यतीत्याशया
राम-नाम स्मरन्ती प्रतीक्षारता ॥२॥

रावणः स्तां समागत्य तातर्ज्यते
त्वं किमर्थं नु रामं च सास्मर्यसे ।
सा वराकी तु मार्जार-यूथैर्वृता
मूषिकेव स्वकालं क्षिपन्ती स्थिता ॥३॥

भूय ऊचे-युवां स्कन्धमारोहतम्
क्षार-सिन्धुं समुल्लङ्घ्य नेष्याम्यहम् ।
यत्र शोक-प्लुता जानकी वर्तते
या वियोगाग्निना तत्र दन्दह्यते ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एष चूडामणिस्ते तयैवार्पितो
गृह्यतां तत्सकाशान्मयासादितः ।
देव ? गन्तुं न कार्यो विलम्बः प्रभो
तत्र मासावधिं प्रत्तवान् नन्वहो ॥५॥

कोऽपि नास्त्येव तत्र स्वकीयो जनो
मैथिलीं संस्मरन् खिद्यते मे मनः ।
मद्विधेनाधिकं नो निवेद्यं विभो
त्वद्विधेयोऽस्म्यहं किं विधेयं प्रभो ॥६॥

राघवो मारुतेरश्रृणोत् तद् वचो
निर्भरं विद्रुतो बाष्पपूर्णो झरः ।
लक्ष्मणश्चारुदत् भ्रातृजायां स्मरन्
म्लानवक्त्रास्तदा सैन्यपाश्चाभवन् ॥७॥

"सागरे दुस्तरे नास्ति सेतुर्यतः
सिंहलं कोऽपि गन्तुं न शक्नोत्यतः ।
रावणो लोक-विद्रावणः स्पर्धते
सेतुमेकं विनिर्माय सन्दर्श्यते ॥८॥

कर्मणानेन कीर्तिध्वजोद्धूयते
लोकसेवा स्थिरा चात्र सम्पाद्यते ।
कृत्यमेकं विधायैव लब्धि-द्वयं
जायते चेत् ततः किं भवेदुत्तमम् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

जायते वर्धते हीयते नश्यति
लौकिकं चक्रमेतत् परिभ्राम्यति ।
जीवनादस्थिरादर्जनीयं स्थिरं
यस्य कीर्तिर्दृढा सुदृढं जीवितम् ॥१०॥"

वायुसूनोः समाकर्ण्य रामो वचः
सिंहलं गन्तुकामस्तदैवोत्थितः ।
मित्र ? सुग्रीव ? चादिश्यतां स्वान् चमून्
तत्र गन्तुं समीहे निहन्तुं रिपून् ॥११॥

अङ्गदो जाम्बवान् नील–मैन्दौ नलः
तार एवं सुषेणो गवाक्षो गजः ।
केशरी चाञ्जनाजानिरेवं ततः
वानरा भल्लुकाः सङ्गताः सर्वतः ॥१२॥

विक्रमी राघवः सूर्यवंश्यः स्थितः
सूर्य–पुत्रस्तु सुग्रीवकश्चेतरः ।
सूर्य-शिष्यो हनूमाँश्च सज्जोऽपरः
निश्चितस्तत्र सर्वत्र पूर्णो जयः ॥१३॥

राघवः सानुजो सागरं दृष्टवान्
किं विचित्रं कृतं ब्रह्मणा प्रोक्तवान् ।
तस्य तीरे स्थितः संस्मरन् जानकीं
तत्र साश्रु प्रवाहो भृशं सोऽरुदत् ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

आर्द्रमङ्गं दधाना प्रसङ्गोत्सुका
कूलिनी सैकताभं दुकूलं धृता ।
वीचि-बाहू वितन्वन्नितः सागर-
स्तां परिष्वङ्क्तुकामो मुहुश्चेष्टते ॥१५॥

गेहिनीभ्यो नदीभ्यः समुद्रश्चिरं
ग्राम्यधर्मं वहन् लब्धसौख्यः स्थितः ।
स ह्यशक्तश्च ताभिर्बलात् न्यक्कृतः
किञ्च तीरे प्रखिन्नः शिरो धूनुते ॥१६॥

ग्राहमत्स्यौ तिमिस्तद्गिलाः कर्कटा
वारिजीवा मिथो द्वेषिणोऽन्तर्जलम् ।
सन्ततेर्वीक्ष्य वैरस्थितिं दुःसहां
यादसां रक्षकोऽसौ विषण्णायते ॥१७॥

योधनायोद्यताः सैन्य-वृन्दैर्वृताः
सूर्य-वंश्याः विमर्शक्रमे ते रताः ।
सेतुमाबध्य चैकं दृढं वारिधौ
राघवो लोकसेवां चिकीर्षुबभौ ॥१८॥

सैकतां सेतु-रेखा-कृतिं शोभनाम्
वेदिकायां विनिर्माय सम्प्रस्तुताम् ।
तत्र नीलो नलश्चेत्युभौ यान्त्रिकौ
दर्शयन्तावभूतां तदा शिल्पिनौ ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सूक्ष्मतः सन्निरीक्ष्यैव सन्दर्शिताम्
कोविदैर्वास्तु-शास्त्रानुकूलं कृताम् ।
सैकतीमाकृतिं चापि दृष्ट्वैव तां
कीर्त्ति-केतुं सुसेतुं विनिर्मीयताम् ॥२०॥

मङ्गलानन्तरं कार्यमारभ्यते
रीतिरेषा जगत्यां दरीदृश्यते ।
आशुतोषः शिवश्चात्र संस्थाप्यते
राम ऊचेऽखिलं भव्यमायोज्यते ॥२१॥

हे हनूमन्नितो हैमशैलं गतो
ज्योतिषो लिङ्गमादाय चायाह्यतः ।
याहि शीघ्रं मुहूर्तो न लङ्घ्यः शुभ-
स्त्वं भवे वायुवेगेन चेहागतः ॥२२॥

लिङ्गमादातुमेवं ययौ मारुतिः
किन्तु लब्धा विलम्बेन शैवाकृतिः ।
हैम-शृङ्गात् हनूमान् यदा प्रस्थितो
मार्ग-मध्ये मुहूर्तः शुभो निर्गतः ॥२३॥

एति कालः परं मारुतिर्नागतः
प्रोक्तवान् राघवोऽसौ प्रतीक्षा-रतः ।
कोऽप्युपायस्तदाऽन्यो न दृष्टो यतः
सैकतं लिङ्गमादाय संस्थापितम् ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नार्मदं यामुनं गाण्डकं गाङ्गकम्
कौशिकं पावनं सद्य आनीय कम् ।
मन्त्र-घोषेण रुद्राभिषेकः कृतः
विल्वधत्तूरकैरर्चितः शङ्करः ॥२५॥

आनकं गोमुखं डिण्डिमं झर्झरम्
मार्द्दलं दुन्दुभिं वेणुकं तन्त्रिकम् ।
वाद्य-वृन्दं तदा वादयद्भिः समै-
र्नृत्य-गीतादिकं प्रस्तुतं सोत्सुकैः ॥२६॥

ईश्वरो रामचन्द्रेण संस्थापित-
श्चात एवाभवत् नाम रामेश्वरः ।
दर्शनं स्पर्शनं पूजनं कीर्तनम्
सौख्यदञ्चात्र तत्रापि मोक्षप्रदम् ॥२७

स व्यतीत्यैव कालः कपिः प्राप्तवान्
सैकतं त्र्यम्बकं स्थापितं दृष्टवान् ।
सद्य एवं विषण्णः स रुष्टोऽभवत्
तत्र केनापि साकं तदा नावदत् ॥२८॥

सैकतं लिङ्गमुत्पाटय चैतत्वहम्
स्थापयाम्येव तत् यन्मयासादितम्
लिङ्गमावेष्टय पुच्छेन यत्नः कृतो
नाशकत् तच्छ्रमो निष्फलत्वं गतः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सव्रणं पुच्छमादाय रामं ययौ
लज्जयाधोमुखो रक्तकान्त्या बभौ ।
राघवो बाललीलामिव ज्ञातवान्
मारुते मैवमुत्तिष्ठ तं प्रोक्तवान् ॥३०॥

शैवलिङ्गन्त्वयानीतमेतत् शुभम्
पुण्यदं चावयोः कीर्ति-विस्तारकम् ।
मारुते ? उत्तरस्यां च तत् स्थापय
नाम दास्ये हनूमत् पुरश्चेश्वरः ॥३१॥

राघवोक्तं तदाकर्ण्य तुष्टः पुनः
लिङ्गमादाय किञ्चित् तदोर्ची गतः ।
स्थापितो रुद्रपेण रुद्रोऽपरो
ह्युत्सवस्तत्र सम्भूय सर्वैः कृतः ॥३२॥

वस्तुतो मारुतिर्ज्ञानवान् कीर्त्यते
राघवस्याग्रतो बालवद् दृश्यते ।
तावुभौ लोक-कल्याण-हेतोरिह
सङ्गतौ दिष्टतः स्वामि-दासाविव ॥३३॥

चारकः कश्चन प्राप्य तं रावणं
वृत्तमूचे तदा राघवीयं श्रुतम् ।
तत्समाकर्ण्य धीमान् कनिष्ठोऽनुजः
साञ्जलिः प्रोक्तवानग्रजं सद्-वचः ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"तिक्तमप्यौषधं सज्जनैर्गृह्यते
तथ्य-वाक्यं कटूक्तं च संश्रूयते ।
अत्र सत्यं वदामि प्रभो ? श्रूयताम्
जानकी सत्वरं राघवायार्प्यताम् ॥३५॥"

रावणश्चाधिगम्यानुजोक्तं वच-
स्तं क्रुधोचेऽद्य मां पामरः शिक्षति ।
सोऽतिरुष्टस्तदोद्यम्य पादं स्वकम्
मूर्ध्नि पृष्ठेऽप्यथोऽपीडयत् निर्दयम् ॥३६॥

द्रष्टुमेवं विधं त्वां न शक्नोम्यहम्
सिंहलात् त्वं बहिर्गच्छ दुष्ट ? द्रुतम् ।
तद् दशास्योक्तमाकर्ण्य चैवं क्षणात्
राघवं संस्मरन् सोऽब्धिपारं ह्यगात् ॥३७॥

तं समायान्तमेवं तु दृष्ट्वाखिला
भल्लुका वानराश्चाभवन् शङ्किताः ।
मारुतिः किन्तु ताँस्तत्र चाश्वस्तवान्
रामभक्तोऽस्ति चिन्ता न हीत्यूचिवान् ॥३८॥

रामचन्द्रः शरण्यो दयालुः स्वयम्
चोत्थितः सस्वजे रावणस्यानुजम् ।
तस्य चैवं विधं वीक्ष्य हार्दं तदा
विस्मयत्वं गता वानरा भल्लुकाः ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अन्तरीपं समुत्पाटयन् मारुतिः
शैलमुच्चैः समुत्खाय तं जाम्बवान् ।
मृत्तिकां लोष्टकं प्रस्तरं पादपं
यो हि यद् दृष्टवानर्णवे क्षिप्तवान् ॥४०॥

तत्र सैन्यानि चोपस्थिताः सैन्य-पाः
सेतु-बन्धस्य कृत्ये सहर्षं रताः ।
देव-गन्धर्व-यक्षास्तथा किन्नरा
वर्षयामासुरेवञ्च लाजाक्षताः ॥४१॥

सागरे दीर्घ-सेतुर्यदा निर्मितो
ह्याञ्जनेयेन रामस्तदा सूचितः ।
सानुजो राघवो यूथपैः सङ्गतः
सोत्सवं सेतु-मार्गेण पारं गतः ॥४२॥

निर्मितः सुन्दरो यत्र पर्णोटजः
सानुजो रामचन्द्रस्तु तस्मिँस्थितः ।
कन्दरासु स्थिताः भल्लुकास्तेऽखिलाः
शाखि-शाख-स्थितास्तत्र शाखामृगाः ॥४३॥

सर्व-कल्याण-कृत् रामचन्द्रस्तदा
प्रैषयत् चाङ्गदं रावणस्यान्तिकम् ।
तेन सः प्रार्थितो मैथिली प्रेष्यताम्
तं च धिक्कृत्य हुङ्कृत्य स प्रोक्तवान् ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"मूर्ख निर्लज्ज बाली पिता ते न वा
तस्य हन्तुः करोष्यत्र दास्यं वृथा ।
रे कुबुद्धे ? इतो याह्यरण्ये चरम्
ब्रूहि तस्यान्तको वर्तते त्वन्तिकम् ॥४५॥

योद्धुमत्रागतो भीतियुक्तः कथम्
मत्त एव प्रमत्तो मृतिं सेत्स्यति ।
ब्रूहि तं सानुजो यात्वितः स्वं गृहम्
ह्यन्यथा तं ससैन्यं हनिष्याम्यहम् ॥४६॥"

पक्षयोरेव वैरं विवृद्धं द्वयोः
पूर्वरङ्गञ्च युद्धस्य सम्पादितम् ।
यूथपो जाम्बवान् भल्लुकैः संयुत-
स्तत्क्षणं योधनायाजिरं प्रस्थितः ॥४७॥

रक्षसां भल्लुकानाञ्च युद्धन्त्वभूत्
यूथपो जाम्बवान् वैरिणोऽजीघतत् ।
तत्र नैके हताः सैनिकाः सङ्गरे
मेघनादो दशास्यात्मजश्चागमन् ॥४८॥

वानराः ? भल्लुकाः ? योद्धुमागच्छत
यूयमद्यैव मत्तो मृतिं लप्स्यथ ।
बाण-सङ्घैस्तु विद्धस्तदा जाम्बवान्
त्वर्ध-मूर्च्छान्वितः सोऽजिरे सुप्तवान् ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

रामदूतः कपीशः सकीशस्ततः
क्रोधरक्तेक्षणश्चाग्रतः प्रस्थितः ।
उक्तवान् मेघनादं कुतो दुर्जन ?
विस्मृतोऽहं त्वया दुष्ट रे ? किम्पुनः ॥५०॥

पर्वतञ्चैकमुत्पाट्य तं प्राहरत्
कूर्दमानो भिया स्यन्दनात् सोऽपतत् ।
स्यन्दनं सारथिर्वाजिनो धूलिसात्
तत्र जाताः समस्तास्तदैकोऽभ्यगात् ॥५१॥

मेघनादो भिया मारुतेः सम्मुखं
नागतः सोऽगमत् योद्धुकामोऽन्यतः ।
तत्क्षणं वीर-हन्त्रीति शक्तिं किल
लक्ष्मणं वीक्ष्य प्रक्षिप्तवान् वेगतः ॥५२॥

मूर्च्छितस्तत्र सौमित्रिरेवाभवत्
रामसैन्येषु कोलाहलः प्रारभत् ।
वानरा भल्लुकाः साङ्गदा यूथपा
म्लानतामापुरेवं पुनर्विस्मिताः ॥५३॥

आत्मनः पौरुषं रावणस्याग्रतो
दर्शयामीति भूयो विचार्यैव सः ।
मूर्च्छितं लक्ष्मणं नेतुकामो ययौ
नाशकत् रिक्तहस्तस्ततश्चाययौ ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतिस्तं तदैवोटजं प्रापयत् ।
राघवोऽपि स्वयं चाश्रुपूर्णोऽरुदत्
आञ्जनेयं दशास्यानुजस्तूचिवान्
वैद्यमानेतुकामः पुरं जग्मिवान् ॥५५॥

राजवैद्यः प्रसिद्धः सुषेणोऽभवत्
भोजनान्ते ऽधिशय्यं स्थित सोऽस्वपत् ।
मारुतिस्तं सशय्यं समादत्तवान्
भीरुको वैद्यराजः कपिं पृष्टवान् ॥५६॥

कोऽसि भोस्त्वां न जानामि कस्मादिह
कुत्र मां नेष्यसि त्वं क्षपायामितः ।
एवमेवं ब्रुवाणं भिषग्वर्यकं
रामदूतः प्रतस्थे समादाय तम् ॥५७॥

"राघवस्यानुजो बाणविद्धः किल
त्वां समादातुमत्रागतोऽहं ततः ।
एत्य शीघ्रं चिकित्सा विधेया त्वया
त्वं चिकित्स्यो भवे मत्त एवान्यथा ॥५८॥"

"द्रोण-शैलेऽस्ति या दिव्य-सञ्जीवनी
स्मर्यतां नाम सा लक्ष्मणोद्बोधिनी ।
मारुते तत्र गत्वा समानीयताम्
क्षेपणं मास्तु कालस्य भोस्त्वर्यताम् ॥५९॥"

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतिः पुप्लुवे तूर्णमेवार्णवं
रावणो ज्ञातवान् वृत्तमेतत् नवम् ।
प्रैषयत् कालनेमिं च तत्राध्वनि
विघ्नमुत्पादनार्थं कपेः कर्मणि ॥६०॥

तत्र सृष्ट्वाश्रमं माययाम्भःसरो
योगि-वेषेण तत्रैव कुर्वँस्तपः ।
मायिको मारुतिं चाह्वयन् सोऽब्रवीत्
स्नाहि तत्रेह मन्त्रं गृहाण प्रधीः ॥६१॥

आञ्जनेयोऽथ स्नातुं गतः पुष्करं
ग्राह एकोऽग्रहीत् तस्य पादौ दृढम् ।
मुष्टिपातं च कृत्वैव तद्वक्षसि
प्राणतत्वञ्च जह्रे मरुन्नन्दनः ॥६२॥

मारुतिः पुप्लुवे वायुवेगेन खं
द्रोणशैलं गतो विस्मयं प्राप्तवान् ।
लक्ष्मणस्यास्ति या प्राण-सन्दीपनी
कास्ति सञ्जीवनी नैव स ज्ञातवान् ॥६३॥

चिन्तितो मारुतिः स क्षणायावसत्
कोऽप्युपायो न दृष्टोऽथ खिन्नोऽभवत् ।
द्रोण-शैलं समूलं समुत्पाट्य च
हस्तमध्ये निधाय प्रतस्थे ततः ॥६४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीक्ष्य पोप्लूयमानं तमेवाद्भुतम्
यायिनं तं विचिन्त्यासुरं मायिनम् ।
तत्र चायोध्यकः केकयी-नन्दनः
प्राहरत् स्वेषुणैवाञ्जनानन्दनम् ॥६५॥

सो ह्यधस्तात् क्रमेणोच्यमानो मुखात्
राम-रामेति साकेत-भूमिन्त्वगात् ।
केकयीजस्तदात्यन्त-खिन्नोऽभवत्
क्षम्यताम् यत् कृतं दुष्कृतं सोऽवदत् ॥६६॥

मारुतिस्तत्र सर्वां कथामूचिवान्
द्रोणमादाय सद्यस्ततो यातवान् ।
औषधं लक्ष्मणायाथ वैद्योऽददात्
तस्य स्वास्थ्यं सुषेणो यथावद् व्यधात् ॥६७॥

राघवोऽहन् रुषा मेघनादं रणे
कुम्भकर्णं जघानाथ तत्संगरे ।
अन्ततो रावणश्चाभवत् चिन्तितो
जेतुकामः प्रयत्नस्तदान्यः कृतः ॥६८॥

सिंहले रावणोऽसौ यथा वर्तते
नागलोकेऽप्यही रावणो दृश्यते ।
सिंहलेशेन स प्रार्थितोऽभूत् यदा
प्राप्तवानब्धितीरं स्वलोकात् मुदा ॥६९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सानुजश्चोटजे राघवः सुप्तवान्-
तत्र रात्रावही रावणः प्राप्तवान् ।
द्वारपञ्चाञ्जनेयं यदा दृष्टवान्
भीति-भीतः क्षणं तत्र सन्तस्थिवान् ॥७०॥

भीषणान्तस्य चैवं विपूर्वस्य स
मायिकं रूपमादाय तूपस्थितः ।
मारुतिः पृष्टवान् मध्यरात्रौ कुतः
निर्भयस्तं च प्रत्यूचिवान् दैत्यकः- ॥७१॥

सान्धिवेलं स्वकृत्यं विधातुं गतो
वारिधेस्तीरमासाद्य तत्र स्थितः ।
ऊर्मिजं शीतलं गन्धवाहं श्वसन्
कीर्तयन् राम-रामेति कालो गतः ॥७२॥

एवमुक्त्वा छली प्राविशत् सोटजम्
दृष्टवान् तत्र सीतापतिं सानुजम् ।
अद्य नेष्याम्यधश्चण्डिकायाः पुरः
मुण्डखण्डद्वयेनार्चयिष्ये ततः ॥७३॥

चिन्तयन्नेवमेवं शयानावुभौ
राघवौ स्कन्धयोः स्थापयन् निर्ययौ ।
प्राप्य पाताललोकं गृहेऽगोपयत्
कोऽपि न ज्ञातवान् तत्र तौ क्व स्थितौ ॥७४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सानुजो राघवः कुत्र प्रागादिति
तत्र पर्णोटजे योऽस्वपद् ह्यो निशि ।
यत्र तत्राभितोऽन्वेषयन्तोऽखिलाः
श्रान्तततामापुरेवं पुनर्विस्मिताः ॥७५॥

कोऽप्युपायो न दृष्टस्तदा प्रार्थितो
मारुतिस्तद् रहस्यं प्रविज्ञातवान् ।
नोदितस्तैरथो नागलोकं गतो
राम-नाम ब्रुवन्नाञ्जनेयस्ततः ॥७६॥

अब्धिकूलं यदा मारुतिः प्राप्तवान्
क्षार-वारि प्रविष्टस्तदा दृष्टवान् ।
मार्गमेकं परं वाडवेनावृतं
ज्वालमालाऽकुलं भीतिदं दुस्तरम् ॥७७॥

याम्यधो लोकमद्योदधे ? सत्वरम्
देहि मार्गं न चेत् शोषयाम्यम्भसम् ।
आञ्जनेयेन सन्तर्जितश्चार्णवो
वर्त्म तस्मै ददौ गन्तुमेवन्त्वधः ॥७८॥

प्राप्य तत्राञ्जनेयोऽदृशत् हर्म्यकं
स्वानुरूपं शिशुं गेह-द्वारि स्थितम् ।
पृष्टवान् कोऽसि भो अत्र कस्मात् वद
मत्सदृक्षः कुतो दृश्यसे रूपतः ॥७९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मत्पिता मारुतिर्बालकश्चोक्तवान्

किं ब्रवीषीति तं विस्मितः प्रोक्तवान् ।

ब्रह्मचारी सदा वर्तते मारुतिः

हे शिशो ? त्वं कथं तस्य वै सन्ततिः ॥८०॥

श्रूयतां मत्पिता सिंहलं दग्धवान्

पुच्छमब्धिं गतो वारिणा सिक्तवान् ।

स्वेदधारा तदा वारिधौ प्रच्युता

कापि मत्सी पिबन्ती गुरुत्वं गता ॥८१॥

मात्सिकस्तां च मत्सीमथानायगाम्

नागलोकं समानीय चोपाहरत् ।

व्यञ्जनार्थं यदा पाचकोऽकर्तयत्

निःसृतोऽहं ह्यहीरावणोऽपोषयत् ॥८२॥

जन्मनैवाभवं सर्वकार्यक्षम-

स्तेन दृष्टो न चान्यो जनो मत्समः ।

व्यश्वसीन्मां भृशं दैत्यराजस्ततो

हर्म्यरक्षार्थमेवं नियुक्तिर्मम ॥८३॥

वीक्ष्य मत्पाटवं सोऽप्यही रावणो

द्वारपालं व्यधात् मामतः कारणात् ।

मत्स्वरूपं दधानो भवान् कः पुनः

सोत्सुकं पृष्टवान् तं स बालो जनः ॥८४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

दैत्य सेवां करोतीति रुष्टोऽपि स
आञ्जनेयो न किञ्चित् तमूचे यतः ।
देशकालानुरूपं बुधैरुच्यते
नैव चेन्मौनमाश्रित्य संस्थीयते ॥८५॥

आञ्जनेयोऽविदत् किन्तु नैवावदत्
बालकं स्नेहतो मन्दमेवास्पृशत् ।
एषमत्स्वेदजः सूनुरेवेति सः
प्रत्तवान् मौनमेव प्रभूताशिषः ॥८६॥

तत्र कार्यान्तरे बालकोऽभूत् यदा
प्राप्तकालः प्रवेष्टुं प्लवङ्गोऽप्यभूत् ।
उच्चकैर्नीचकैर्दृष्टवाँश्चाभितः
सूक्ष्मरूपं दधद् हर्म्यकं सोऽविशत् ॥८७॥

सोऽप्यही रावणस्तान्त्रिको मायिको
मन्दिरस्यान्तराले सपर्योत्सुकः ।
सानुजं राममादाय पूजास्थलम्
छागवत् कीलके बद्धवाँस्तौ दृढम् ॥८८॥

रावणोऽसौ द्वितीयोऽप्यही रावण-
स्तेन तुल्यं स्मृतो लोकविद्रावणः ।
यस्त्वखण्डं सदा ब्रह्मचर्ये स्थित-
स्तद्विघाताय शक्तो हनूमान् किल ॥८९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

ईदृशो वीर्यवान् केवलं मारुति-
स्तं निहन्तुं तदन्यो न चान्यः क्षमः ।
लक्ष्मण? त्वं कुरुष्वेह तस्य स्मृतिं
प्राप्तरामाभ्यनुज्ञः स चक्रे मतिम् ॥९०॥

ब्रह्मचर्यं तपो वीर्यदं कीर्तिदं
ब्रह्मचर्यं व्रतानां व्रतं कीर्तितम् ।
ब्रह्मचर्यव्रती यः स मृत्युञ्जयो
ब्रह्मचारी महानाञ्जनेयः किल ॥९१॥

ब्रह्मचर्य-प्रभावेण ता देवता
नैव मृत्युं लभन्ते सदा निर्जराः ।
ब्रह्मचर्ये दृढो मारुतिः केवलं
यो निहन्तुं क्षमो राघव-द्वेषिणम् ॥९२॥

राम-रामानुजौ तौ गृहस्थावुभौ
मारुतिं संस्मरन्तावभूतां भृशम् ।
लक्ष्मणश्चेतसा ब्रह्मवर्चस्विनं
तं समाहूतवान् प्रार्थयन् सस्तवम् ॥९३॥

"नवोदयं खे स्थितमर्कमेवं
रक्तं फलं स्वादु च मान्यमानः।
यः सूर्यलोकं प्लवते सकाम-
स्तं वायुसूनं मनसा प्रणामः ॥९४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

योऽलङ्घयत् सागरमञ्जसैव
सम्प्राप्य लङ्काञ्च ददर्श सीताम् ।
स्थितामधोऽशोकतरोः सशोकां
व्यधादशोकां तमहं स्मरामि ॥९५॥

यो भव्यमुद्यानमुपेत्य भूयो
भटान् पुरोगाँश्च निषूद्य तत्र ।
यो रावणिं चाक्षयमाजघान
जज्वाल लङ्कां तमहं स्मरामि ॥९६॥

हे वायुसूनो रघुवंशबन्धो
रुद्रस्य चैकादशरूपधारिन् ।
भो आञ्जनेय त्वमिहागतः स्याः
सङ्कष्टतो नौ प्रविमोक्तुमाशु ॥९७॥

मृणमयी तत्र देव्यास्तु मूर्त्तिः स्थिता
या करालासिहस्ता महाकालिका ।
रक्तजिह्वोर्ध्वकेशा त्रिनेत्राञ्चिता
सिंहसंस्था तथा मुण्डमालाङ्किता ॥९८॥

कालिकाविग्रहस्यैव पश्चात् कपि–
मौंनमासाद्य कैरप्यदृश्यःस्थितः।
मारुतिस्तत्र शक्तेः स्वरूपं दधौ
चण्डिकान्तर्हिता सैव तत्र स्थितः ॥९९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रोक्षणीपात्रमन्यत् पवित्रोदकं
बर्हिराज्यं पवित्रं हविः पायसम् ।
तोरणैः कन्दलीस्तम्भभिर्भूषितं
होमकुण्डं बृहत् तत्पुरो निर्मितम् ॥१००॥

पाद्यमर्घ्यं च शुद्धोदकं निर्मलं
यत्र पञ्चामृतं गन्ध-लाजादिकम् ।
धूपदीपैश्च नैवेद्य-ताम्बूलकै-
र्नैकपूजोपहारैर्लसत् मण्डपम् ॥१०१॥

भक्ष्यभोज्यादिकं यन्त्यवेदीत् करे
वायुपुत्रेण सर्वं तु तद् भक्षितम् ।
तत्वमेतत्त्वहीरावणोऽपि स्वयं
नैव विज्ञातवानद्भुतं यत्वभूत् ॥१०२॥

कालिका त्वद्य तुष्टेत्यसौ कल्पयन्
मोदमानो बलिं दातुकामो ययौ ।
रक्ष नौ हे हनूमन्निति प्रोचतु-
र्मारुतिं प्रार्थयन्तावुभौ राघवौ ॥१०३॥

सोऽचिरं चण्डिकायाश्च खड्गं दधौ
मस्तकं तस्य विच्छिद्य दिव्यं बभौ ।
व्योमतः पुष्पवृष्टिस्तदाजायत
देवता दध्वनुर्मारुते ? ते जयः ॥१०४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतिर्मारुतेरात्मजश्चाप्युभौ
राघवं लक्ष्मणं च प्रणम्य स्थितौ ।
तौ च तावाशिषैर्वर्धयामासतु-
र्नागलोके जना स्तस्य कीर्तिं जगुः ॥१०५॥

मातृरूपं सदा यस्तु नारीजनं
दृष्टवान् ब्रह्मचर्ये स्थितोऽहर्निशम्
मारुतेरात्मजस्तस्य चायं कथं
लक्ष्मणस्तत्र भूयोऽन्वभूद्विस्मयम् ॥१०६॥

बालकः पूर्ववृत्तं तदावर्णयत्
ज्ञातवाँस्तद् रहस्यं पुनर्लक्ष्मणः ।
राम ऊचे हनूमत्सुतं वत्सक ?
राज्यमेतत् तवातो यशस्वी भव ॥१०७॥

राघवश्चादिशत् लक्ष्मणं तत्क्षणम्
कल्पय त्वं तु राज्याभिषेकोत्सवम् ।
कौशलेयेन शास्त्रानुकूलं तत
स्तत्सुतो राजसिंहासने स्थापितः ॥१०८॥

स्कन्धमारोप्य तं राघवं सानुजं
मारुतिर्वेगतः प्राप्तवान् सिंहलम् ।
तत्र सुग्रीवमुख्याः समे हर्षिता
आञ्जनेयस्य शुभ्रं यशो विस्तृतम् ॥१०९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पारावारस्य पारे तटमुपगतवान् सिंहलादाञ्जनेयः
भल्लूकैर्वानरैस्तैर्गणपतिसहितै राम-सान्निध्यमेत्य ।
नत्वा चूडामणिं ते सविनयमददात् सीतया तत्र दत्तं
सेतुं कृत्वाब्धिमध्ये रघुपतिसहितं भूय एवं प्रतस्थे ॥११०॥

श्रीरामो मकरध्वजं कपिसुतं पताल-सिंहासने
संस्थाप्यैव तथाभिषिच्य सविधि प्रोवाच दिव्याशिषः ।
हत्वैवं त्वहिरावणं स हनुमानुन्मुच्य तद्बन्धनात्
आरोप्याथ सलक्ष्मणं रघुपतिञ्चादाय स्कन्धे ययौ ॥१११॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने काव्ये द्वादशः सर्ग ईरितः ॥११२॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

त्रयोदशः सर्गः

(उपजातिच्छन्दः)

दिवाकरोऽस्तङ्गतवान् प्रतीच्यां
निशाकरः प्रागुदयाञ्चकार ।
प्रत्यागतो दाशरथिः स जन्यात्
प्लवङ्गमाहूय रहस्युवाच ॥१॥

"युद्धे व्यतीतानि दिनानि सप्त
दशाननं हन्तुमहं न शक्तः ।
मया प्रयुक्तान्यखिलानि तानि
शस्त्राणि तस्मिन् विफलं गतानि ॥२॥

उपायजातं किल नावशिष्टं
द्विषो विघाताय किमत्र कृत्यम् ।
रिपोः क्षयः स्यात् समरे जयः स्यात्
कथं मम ब्रूहि यशश्चिरं स्यात् ॥३॥

दुर्लङ्घ्यमब्धिं सहसा विलङ्घ्य
प्रविश्य लङ्कां द्विषदो निषूद्य ।
रक्षोगणैरेवमतिप्रभीतां
सीतां समन्विष्य कपे ? ददर्श ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वाटीमशोकां कृतवान् सशोकां
त्वमेव सीतां विदधे विशोकाम् ।
एवं दशास्यस्य सुतः कनिष्ठो
हतस्त्वयैवाक्षयको बलिष्ठः ॥५॥

उत्प्लुत्य चोत्प्लुत्य विदाह्य लङ्कां
दशाननं तर्जितवाँस्त्वमेव ।
सेतुं विनिर्मातुमथाब्धिमध्ये
विमृष्टवान् पूर्वमिह त्वमेव ॥६॥

दृष्ट्वानुजं कश्मलमादधानं
वैद्यं समादाय गृहात् सुषेणम् ।
सञ्जीवनीमानयितुं प्रयात-
स्तं जीवयामास सखे ? त्वमेव ॥७॥

त्वं रावणस्येह वधाच्च पूर्वं
कपे ? अहिं रावणमाजघन्थ ।
कथं दशास्यं विनिहन्मि तात ?
रामः कपिं खिन्नमना जगाद ॥८॥

ततस्तमीशं शिवमभ्युपेतो
विज्ञातवान् रावणमृत्युहेतुम् ।
न्यवेदयद् दाशरथिं विषण्णं
कृतप्रणामः स कटे निषण्णः ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पुरा पुलस्त्यस्य मुनेः स नप्ता
चिराय तुष्टाव हिरण्यगर्भम् ।
बभूव स प्रीतमनाः पुरस्तात्-
दशास्यमित्थं वचनं जगाद ॥१०॥

मृत्युर्नरादेव भविष्यतीति
त्वं ज्ञातपूर्वोऽपि तपः किमर्थम् ।
समृद्धयस्ताः सकलाः करस्था
ददानि भूयो वद किं त्वदर्थम् ॥११॥

नूनं मरिष्यामि मनुष्यतोऽहं
परं न जाने करणं किमस्ति ।
मुष्ट्यां नु दण्डेन नु चाश्मना वा
पद्भ्यां नु दन्तैर्दशनेन किं वा ॥१२॥"

"अज्ञोऽसि विज्ञोऽपि बुधोऽप्यविद्यो
मृत्योर्भिया मौढ्यमुपागतोऽसि।
यो जायते स म्रियते ध्रुवं तत्
ज्ञात्वाप्यहो ? त्वं वत चिन्तितोऽसि ॥१३॥

भोगार्थमेषा तव जीवनाशा
कदापि शान्ता न हि ते कदाशा
भोगेन लिप्सा तु विवर्धते ह
भोगीव भोगो व्यथते सदैव ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अहिस्तु भोगी नितरां स कामी
भो रावण ? त्वं नु कथं तथा भूः ।
द्विजोऽपि दुष्टः पठितोऽप्यशिष्टः
स्वैरी वरिष्ठोऽप्यवनौ लघिष्ठः ॥१५॥

दृष्ट्वा मतिं तेऽस्मि दशास्य ? खिन्न-
स्तथापि नूनं तपसा प्रसन्नः ।
ददामि चैकं विशिखं त्वदर्थं
जानीहि मृत्योस्तव हेतुभूतम् ॥१६॥"

अभूददृश्यो विधिरेवमुक्त्वा
ततो दशास्यः स्वपुरीमियाय ।
इषुं प्रदत्तं परमेष्ठिना स
गृह्णन् स्वहर्म्यं प्रविवेश सद्यः ॥१७॥

अन्तः पुरस्थां सहधर्मिणीं स्वां
मन्दोदरीं रावणमाजुहाव ।
उपेत्य कोष्ठं विजनं तदैव
रहस्यमेतत् सकलं जगाद ॥१८॥

जानीहि मृत्योर्मम हेतुरेषो
वैधव्यहेतुश्च तवापि भूयः ।
रक्ष त्वमेनं तु सदा निगूढं
गुह्यं यथा रक्षसि गोपितं स्वम् ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्ञी भिया वेपथुमाददाना
न सायकं द्रष्टुमहो शशाक ।
आश्वासिता तत्पतिना शरं सा
करे स्वकीये दधती जगाद ॥२०॥

"रक्षाम्यसुभ्योऽप्यधिकं निगूढं
न कापि चिन्ता भवता विधेया
न चैनमुद्दिश्य वदामि कञ्चित्
दशाननस्यास्म्यहमत्र भार्या ॥२१॥"

पत्या प्रदत्तं विशिखं गृहीत्वा
प्रविश्य चान्तः शयनप्रकोष्ठम् ।
स्तम्भोदरं तत्र विदार्य किञ्चित्
मन्दोदरी ब्रह्मशरं जुगोप ॥२२॥

चेत् प्राहरिष्यत् विशिखेन रामो
नूनं दशास्यस्त्वमरिष्यतेति ।
केनाप्युपायेन यतस्व लब्धुं
शिवस्तमूचे सफलो भवेति ॥२३॥

ज्ञात्वा ततो रावणमृत्युहेतुं
हृष्टो हनूमान् प्रययौ कुटीरम् ।
न्यवेदयद् दाशरथिं विषण्णं
प्लवङ्गवर्यः पुरतो निषण्णः ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तत्सायकं रावणहर्म्यसंस्थ-
मादातुकामो बलवान् प्रधीमान् ।
ततः कुटीरादहिरावणारि-
र्ययौ स वृद्धद्विजवेषधारी ॥२५॥

पञ्चाङ्गपत्रं कठिनीञ्च नीत्वा
धृत्वा कपिर्लेखनपट्टिकाञ्च
मौहूर्त्तिकस्यैव विधाय रूपं
स जग्मिवान् सिंहलराजहर्म्यम् ॥२६॥

वृद्धं च तं ज्यौतिषिकं विलोक्य
सामान्यतस्तस्य वपुः परीक्ष्य ।
तत्र स्थिता गोपुरपालकाश्च
तस्मै प्रवेशं प्रददुः प्रणम्य ॥२७॥

अन्तः पुरस्थाः परिचारिकास्ताः
समेधमाना वयसा नवेन ।
जिज्ञासमाना नियतिं स्वकीयां
निरुद्धयमार्गं सहसा निषेदुः ॥२८॥

प्रायो ह्यनूढाः कतिचिन्नवोढा
बाला द्वितीये वयसि प्रविष्टाः ।
उपेत्य तत्र स्थविरोपकण्ठे
प्रष्टुं त्वहंपूर्विकया समुत्काः ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

स्यूतं स्वकीयं शिथिलं विधाय
निस्कास्य द्रव्यञ्च समर्पयन्त्यः
ब्रूहीति दिष्टं सकलं ब्रुवत्यः
करावुभौ सम्पुटितौ प्रकृत्य ॥३०॥

स्थितासु काश्चित् चपलाः किशोर्यः
श्मश्रून् कराभ्यां च परामृशन्त्यः ।
पश्येह पूर्वं मम भाग्यरेखा-
मिति ब्रुवन्त्यः परितो न्यवात्सुः ॥३१॥

अश्वं समारुह्य वरो मदीयः
कदा वधूकृत्य च नेष्यतीति ।
पत्युर्गृहं मे भविता कथं नु
कथं ननान्दा प्रभविष्यतीति ॥३२॥

भवेन्नु कस्यां दिशि मे विवाहः
पतिस्तु मे स्निह्यति मां कियत् सः ।
श्वश्रूश्च मे स्याद् वद कीदृशीति
पप्रच्छ काचिद् तमिदं वधूटी ॥३३॥

आजन्मनः स्वां जननीं विहाय
स्पृष्टा न चान्या महिला तु येन ।
सम्पादनायैव हि रामकार्यं
संवेष्टितोऽसौ ललनाजनैश्च ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

संस्पर्शदोषो न भवेन्ममेति
कपिः स नाम स्मृतवान् शिवेति ।
क्व यानि किं वा करवाणि चैतत्
विचिन्तयामास तदैव शश्वत् ॥३५॥

दूरायमाणश्चपलाभ्य आभ्य
ससंभ्रमोऽयं परितो दधाव ।
ताभिश्च सर्वाभ्यनुगम्यमान-
स्तरुं समारुह्य तमध्युवास ॥३६॥

तरोरधः प्राप्य च तासु काश्चित्
सम्भूय वृक्षं प्रविधूनयन्ति ।
अन्या हि लोष्टाँश्च लघून् दधाना
मौहूर्त्तिकं तं परितः क्षिपन्ति ॥३७॥

कृशोदरीभिः परिचारिकाभि-
र्मन्दोदरी सापि तु निःसृताभूत् ।
सोपानमार्गेण वरुह्य नीचैः
कोलाहलस्थानमितो गताभूत् ॥३८॥

अट्टालिकायां प्लुतवान् प्लवङ्गः
सूक्ष्मेण देहेन यथा पतङ्गः ।
ततस्तदन्तःपुरगं प्रकोष्ठ-
मनङ्गलीलास्थलमभ्युपेतः ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नित्यं प्रदीप्ताः खलु रत्नदीपाः
शय्या महार्घ्यैर्वसनैश्च सज्जाः ।
भोग्यं मनोज्ञं सकलञ्च वस्तु
नान्यत्र लभ्यं स कपिर्ददर्श ॥४०॥

यः सिंहलेशेति भुवि प्रसिद्धो
भ्राता धनेशस्य शिवस्य भक्तः ।
पौत्रः पुलस्त्यस्य च विप्रवंश्यो
दुष्टायते नष्टचरित्र एषः ॥४१॥

नृणां समाजं विदधाति गर्ह्यं
स्त्रीणां चरित्रं प्रकरोत्यवद्यम् ।
द्वेष्टा सतां दुष्टमतिर्दशास्यो
दण्ड्यः किलायं सकुलं विनाश्य ॥४२॥

प्रविश्य लब्धावसरः कपीशः
स्तम्भं प्रविस्फार्य शरं जहार ।
वातायनाद् दक्षिणतः प्लुतोऽसौ
तमब्धिकूलं तरसा निनाय ॥४३॥

नत्वा स रामं सशरो हनूमान्
स्मित्वैव तस्मै विनतः प्रदाय ।
उदन्तमावेद्य यथानुभूतं
सभासदां तत्र मुदं चकार ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

सिंहले तत्र युद्धस्य व्यतीते सप्तमेऽहनि ।
रावणो न मृतश्चेति रामश्चिन्तायुतोऽभवत् ॥४५॥

मृत्युबीजं परिज्ञाय कपिः शङ्कर-नोदितः ।
पारमेष्ठ्यं शरं तत्र राघवाय प्रदत्तवान् ॥४६॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने सर्गस्त्रयोदश इहेरितः ॥४७॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

चतुर्दशः सर्गः

(स्रग्विणीच्छन्दः)

भीषणोऽथो विपूर्वोऽरिपक्षं गतो
    ह्यक्षयस्याप्यभूत् जीवनस्य क्षयः ।
मेघनादो हतः कुम्भकर्णो मृतः
    रावणः केवलो योधनाय स्थितः ॥१॥

दूरतो दृष्टवान् मारुती रावणं
    रुष्टवान् स्वां गदामुद्यमन् तत्क्षणम् ।
धावमानो दृढं मुष्टि-पातं व्यधात्
    भीति-भीतोप्यभीतो यथा सोऽवदत् ॥२॥

मुष्टिपातेन रे ? मां प्रहर्त्तुं किल
    चेष्टसे मच्छरीरं भृशं मर्द्दय ।
अद्य कण्डूयतेऽनारतं मे वपु-
    स्त्वं निपीडयैव खर्जूः प्रशान्तं कुरु ॥३॥

भ्रष्टबुद्धे ? कथं राघवं सेवसे
    रावणं लोकविद्रावणं सेवय ।
दास्यते ते प्रभूतं भरण्यं मया
    लप्स्यते चैहिकं सौख्यजातं त्वया ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुती रावणोक्तं प्रतिख्यातवान्
त्वं दशास्यो यतोऽस्त्येव वाचालताम् ।
जानकीं राघवाय प्रयच्छाचिरं
ह्यन्यथा चाजिरेऽस्मिन् मृतिं यास्यसि ॥५॥

नैकवारं तु नाडिन्धमस्त्वाहते
लौहकारः सकृन्मात्रमत्राहते ।
एक–मुष्टि–प्रहारं करिष्याम्यहम्
ह्यन्तकस्यान्तिकं यास्यसि त्वं ध्रुवम् ॥६॥

साट्टहासं कपिं प्राहरत् रावण–
श्चाञ्जनेयोऽभवत् तत्र रक्तानन: ।
सानुजो राघवः प्राप्तवाँस्तत्क्षणं
युद्धभूमावभूत् भीष्ममायोधनम् ॥७॥

एकतो वह्निना चान्यतो वारिणा
पर्वतश्चापतन् धूयते वायुना ।
तत्र शस्त्रास्त्रकं क्षिप्तमेवं मिथ–
स्तत्क्षणं धूलिसाज्जायते तत्किल ॥८॥

एकतो राघवश्चान्यतो रावणो
भीषणोऽदृश्यतैवं द्वयोराहवः ।
नैव कुत्रापि चास्योपमा लभ्यते
संहतैरेवमेवाभितः प्रोच्यते ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

प्रातरारभ्य जातं तु जन्यं तयो-
स्तत्र सूर्यास्त-पर्यन्तमेवोभयोः ।
आहतं कीश-भल्लुकयूथं तथा
मारितास्तत्र लक्षाधिकाः राक्षसाः ॥१०॥

यस्य वश्यं समस्तं त्रिलोकन्त्वभूत्
द्वारपो यस्य हर्म्ये कृतान्तः स्थितः ।
रावणस्याप्यभूत् तत्र तेजो वधो
ब्रह्मबाणेन रामेण विद्धो हतः ॥११॥

आञ्जनेयोऽहिपूर्वं त्वहन् रावणम्
राघवश्चावधीत् सैहलं रावणम् ।
तत्र पूर्णं द्वयोर्जन्मनः कारणम्
सस्वजाते मिथस्तौ मुदानारतम् ॥१२॥

राघवः सिंहले वैरशुद्धिं व्यधात्
वृत्तमेतत् तदा सर्वतश्चाभ्ययात् ।
वानराः किन्नरा मानुषा देवताः
हर्षमापुस्तदा सिद्ध-विद्याधराः ॥१३॥

जानकीं द्रष्टुकामस्तदा राघवः
शिंशपा-वाटिकामभ्यगात् सानुजः ।
सन्ददर्श प्रियां तत्र चिन्ताकुलाम्
तत्प्रतीक्षारतां दृग्जलां दुर्बलाम् ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राज्यं प्रदाय सहसैव विभीषणाय
सानन्दमङ्गदमुखान् निकटे निधाय।
रामस्तया दयितया सह सीतयागात्-
आरुढपुष्पकरथः स तदर्ष्यमूकम् ॥१५॥

मर्कटानां स्त्रियश्चागता एकतो
भल्लुकीनां गणोऽप्यागतश्चान्यतः।
जानकी सा भवेत् कीदृशी शोभना
द्रष्टुकामा उपेता मृगाणां गणाः ॥१६॥

सा रुमा राजपत्नी ददर्शाथ तां
सस्नुषा साङ्गदाम्बा लुलोकाथ ताम्।
दृष्टवत्योऽखिला मृग्य एवं तत-
श्चाक्षिपन्त्यो मिथो वक्तुमारेभिरे ॥१७॥

नास्ति लाङ्गूलकं वैरिणां वारकम्
दृश्यते सर्वमङ्गं पटाच्छादितम्।
कापिशे अक्षिणी चापि न स्तः कथम्
सुन्दरीं प्राहुरेतादृशं स्त्रीजनम् ॥१८॥

पाद-युग्मेन चासम्भवास्याः प्लुति-
र्नैव लोमानि शीते भवेत् का गतिः ।
ईदृशीं चाङ्गनां प्राप्तुमेतादृशो
व्यर्थमेव प्रयासोऽत्र सर्वैः कृतः ॥१९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तिन्दुकं कट्फलं किञ्च रम्भाफलम्
मूलकं मर्कटान्नं मुदोपाहृतम् ।
सानुजो राघवो हस्तमुद्यम्य ह
स्वानुकम्पां तदादर्शयत् स्नेहतः ॥२०॥

पुष्पकं काञ्चनाद्रिं ततः प्रस्थितं
ह्यञ्जनाजानिना तत्पथो दर्शितः ।
प्राप्य सर्वेऽवरुढास्तदा सज्जनाः
स्वागतं व्याहरत् तत्र माताञ्जना ॥२१॥

अञ्जना-सम्मुखं मारुतिः सोऽभ्यगात्
वाष्प-पूरं तदा नेत्र-युग्मं व्यधात् ।
क्षालयन्नेव तद्-वारिणाङ्घ्रि-द्वयम्
प्राणमत् सादरं स स्वकां मातरम् ॥२२॥

मारुतेर्मातृभक्तिं यदा सोऽदृशत्
राघवः साश्रुपूर्णेक्षणश्चाभवत् ।
लक्ष्मणोऽप्येवमेवारुदत् तत्क्षणं
संहतास्तत्र सर्वे रुदन्तोऽभवन् ॥२३॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः।
हनूमदयने सर्गश्चतुर्दश इहेरितः ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

पञ्चदशः सर्गः

(मञ्जुलाच्छन्दः)

गन्धमादनामिधं पर्वतं स दृष्टवान्
सीतया समन्वितो राघवोऽवरूढवान् ।
लक्ष्मणोऽथ मारुतिश्चाङ्गदो विभीषणः
पुष्पकादवारुहँस्तत्र हर्षितेक्षणाः ॥१॥

यत्र ते ह्यनातपं वृक्षमूलमाश्रिताः
तापसैर्गृहस्थिभिर्मानुषैश्च संवृताः ।
कन्द-मूल-वारिभिश्चैवमासनादिभिः
भक्तितो हि सत्कृतास्तत्र पायसादिभिः ॥२॥

रावणस्तु कर्मणा राक्षसो द्विजोऽपि सन्
राघवः सगोत्रजं तं दशाननं त्वहन् ।
ब्रह्म-हिंसनोद्भवं किल्विषं समर्जितम्
तत्प्रणाशनाय सोऽचिन्तयत् दिवानिशम् ॥३॥

तत्र धर्म-शास्त्रिभी राघवो निवेदितः
स्थापितो भवेत् प्रभो पार्वती-पतिः शिवः ।
राघवस्तदादिशत् लिङ्गमानयत्विति
मारुतिस्ततो ययावुत्तरां दिशं प्रति ॥४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

नर्मदा-नदी-तटं मारुतिस्तु जग्मिवान्
लिङ्गमेकमद्भुतं प्राप्य सः प्रतस्थिवान् ।
वायुवेगतस्ततः सत्वरं समाययौ
नार्मदीं शिवाकृतिं दर्शयन् कपिर्बभौ ॥५॥

यत्र वेदपाठिभिः स्वस्तिवाचनं कृतम्
तत्र वास्तु-शिल्पिभिर्मन्दिरञ्च निर्मितम् ।
राघवेण भक्तितः स्थापितस्तदेश्वरो
नाम चापि दत्तवान् स ह्युमामहेश्वरः ॥६॥

सङ्गताः स्त्रियस्तदा यान-मङ्गलं जगुः
राघवादिकाः समे पुष्पकेण संययुः ।
लक्ष्मणः सुसूचिवान मैथिलीं प्रतिस्थलम्
ते द्रुतं गता अयोध्याभिधं पुरं स्वकम् ॥७॥

पुष्पकादवारुहन् राघवः सलक्ष्मणः
साङ्गदो रुमा-पतिर्मारुतिः सुलक्षणः ।
स्वं गुरुं प्रणम्य तं तत्र भक्ति-पूर्वकम्
मातृ-वर्गमप्यथो प्राणमत् यथाक्रमम् ॥८॥

अग्रज-द्वयं स्वकं केकयी-सुतोऽनमत्
भ्रातरं च राघवः स्वाशिषा समर्धयत् ।
सोऽपि तत्र पादुके ह्यग्रजाय चार्पयत्
स्नेह-सागरस्तदा सोर्मिकोऽभितोऽवहत् ॥९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

बालको युवा तथा वृद्धपुङ्गवो जनः
तत्र संगता यतोऽभूत् बृहन् च सङ्गमः ।
वैरिणां समूलमुन्मूलनं कृतं यतः
ते ह्यजूघुषन् यशोवाक्य-संहतिं ततः ॥१०॥

वीक्ष्य भं शुभं तदा ज्योतिषां विदा पुनः
निश्चिता शुभा तिथिर्वासरश्च शोभनः ।
राघवं समैथिलीञ्चाभिषिच्य मन्त्रतः
दत्तवान् नृपासनं शास्त्रपूर्वकं ततः ॥११॥

याजकाः प्रयाजका सेवका धनार्थिनः
तेऽखिलाः प्रसादिताः शिल्पिनो मनीषिणः ।
राघवस्य विश्रुता सर्वतो वदान्यता
विस्तृताभितस्तदा तस्य धन्य-धन्यता ॥१२॥

अङ्गदो विभीषणो ये च सङ्गरे स्थिताः
राघवेण ते समे सक्रमं विभूषिताः ।
मारुतिस्तदा पुनः खिन्न-मानसोऽभवत्
म्लानतां गतो यतोऽलङ्कृतः स नाभवत् ॥१३॥

जानकी तु वत्सला भास्वरं मनोहरं
सन्ददे हनूमते हारमेव मौक्तिकम् ।
भक्तियुक्तचेतसा सेवते हि यो जन-
स्तेन लभ्यतेऽखिलं दुर्लभं न किञ्चन ॥१४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

अश्रुपूरितेक्षणः शान्तिमाप तत्क्षणम्
कान्तिमद् विभूषणं प्राप्य तद् विलक्षणम् ।
स प्लवङ्गपुङ्गवो राम-नाम कीर्तनम्
प्रारभत् मुदा तदा दिव्य-भव्य-नर्तनम् ॥१५॥

मारुतिर्मुहुर्मुहुर्दृष्टवान् भुजान्तरम्
मौक्तिकेषु बिम्बितं ज्ञातवान् स्वमाननम् ।
नर्तनं त्यजँस्तदा म्लान-मानसस्थितः
विस्मयं गता जनास्तां स्थितिं विलोक्य ह ॥१६॥

वक्षसि प्रलम्बिता मौक्तिकी ललन्तिका
तत्क्षणं हनूमता सा पुनः करे धृता ।
त्रोटितं हठादहो तत्र हार-सूत्रकम्
स्फोटितं स्व-दंष्ट्रया कान्तिमत् तु मौक्तिकम् ॥१७॥

तेन वक्षसि स्थितं हारकं मनोहरम्
त्रोटितं न केवलं स्फोटितञ्च मौक्तिकम् ।
दर्शका अपि क्रुधा चाग्नि-सन्निभेक्षणा
जानकी च सावदत् तत्र विस्मितानना ॥१८॥

"किं करोषि मारुते मा कुरुष्व भो न न"
"नास्ति राघवोऽत्र चेत् किम्प्रयोजनं मम ।
राघवं त्वया युतं स्थापयामि वक्षसि
अत्र मौक्तिकेषु वां नैव वर्तते स्थितिः ॥१९॥"

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तर्हि किं स्थिताावुभौ भोस्त्वदीय-वक्षसि
दर्शय द्रुतं कपे सेत्युवाच मूढधि ? ।
दृश्यतामिहेत्यथो मारुतिस्तदावदत्
तत्क्षणं नखैः पुनः स्वं हृदं व्यदारयत् ॥२०॥

हृद्-दरी तु वानरी दिव्यया रुचा बभौ
राघवश्च जानकी तत्र सस्मितं स्थितौ ।
भक्तिमीदृशीं दृढां वीक्ष्य राघवोपरि
विस्मयं गता जना मारुतेस्तदैव हि ॥२१॥

नेत्रतोऽश्रु-निर्झरो वक्षसोऽस्र-निर्झर
स्यन्दतोऽथ निर्भरं मारुतेः शरीरतः ।
सीतयान्वितस्तदा राघवो हनूमतः
दृश्यते हृदि स्थितः स्नानमाचरन्निव ॥२२॥

विस्मितो हि राघवो मैथिली च विह्वला
सांसदास्तदाभवन्नश्रुपूरितेक्षणाः ।
कारुणार्णवोऽभितो वीचिमान् विभाव्यते
संसदेव किन्वहो तत्र चावगाहते ॥२३॥

राघवस्त्रिलोकराट् राजते नृपासने
मारुतिः स भक्तराट् भ्राजते कुथासने ।
देव-यक्ष-सिद्ध-गन्धर्व-किन्नरास्तदा
वाकिरन् सुमान्यथो ते जगुर्जयं मुदा ॥२४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राम-सन्निधौ दिवा राम-सन्निधौ निशि
राम एव जागरे निद्रिते स एव हि ।
मारुतिस्तदा सदा राम-नाम संजगौ
स्वांशतः स शङ्करः पूर्ण-किङ्करो बभौ ॥२५॥

मारुतिस्त्वहर्निशं राघवं हि सेवते
एकमप्यहो क्षणं नान्यकेन लभ्यते ।
चिन्तयानया तया सीतया च सङ्गता
अङ्गदादयः समे मन्त्रणां व्यधुस्तदा ॥२६॥

राम-सेवको ह्यसौ केवलो न मारुती
राघवस्य सेवकाः स्मो वयं तथापि हि ।
नावशिष्यते क्षणं चेत् कथं स सेव्यते
निष्प्रयोजनं किलास्माभिरेवमुष्यते ॥२७॥

खण्डशोऽप्यहर्निशं तत्पुनर्विधीयताम्
सेवका वयं कति स्मोऽत्र तच्च गण्यताम् ।
भज्यतां यथायथं लेशमात्रमप्यथ
मास्त्वितस्ततस्तदा लभ्यते क्षणं ततः ॥२८॥

पत्रमेकमाददानास्तदा समेऽलिखन्
कृत्स्नमेव कर्म हर्म्ये भवं यथातथम् ।
मारुतेस्तु नाभवत् नाम तत्र चाङ्कितम्
मैथिली गता तदादाय रामसम्मुखम् ॥२९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

वीक्ष्य कार्य-तालिकां राघवः स्मितोऽभवत्
स्वाक्षरैः सनाथितां तां पुनः समार्पयत् ।
तैः प्रसन्न-मानसैः रामकिङ्करैस्तदा
सूचनाय तालिका साभितः प्रदर्शिता ॥३०॥

मारुतिर्न दृष्टवान् किन्तु नाम स स्वकम्
किङ्करैस्तदेतरैरन्वभूत् तिरस्कृतम् ।
किं करोमि याम्यहं कुत्र वेत्यचिन्तयत्
धिग्धिगेव विब्रुवन् स्वस्य मूर्धन्यताडयत् ॥३१॥

सेवकैरिहाखिलैर्नाम तत्र सेव्यते
राघवस्य जृम्भणे ह्यङ्गुली न शब्द्यते ।
तस्य नास्ति सेवकस्तत्र तालिकास्वपि
कर्म तत् करोम्यहं सत्सु सेवकेष्वपि ॥३२॥

ईक्षते कपिः कदा राघवो विजृम्भते
सोऽनिमील्य चाक्षिणी तन्मुखं च वीक्षते ।
उद्यमन् करं स्वकं तस्य सन्निधौ स्थितो
नाम-जाप-पूर्वकं राम-सेवने रतः ॥३३॥

ते व्यधुर्यथा यथा मारुतेस्तिरस्क्रिया-
मेवमेव स व्यधात् तत्र तत्प्रतिक्रियाम् ।
भक्ति-भाव-भाविताः सन्ति किन्त्वनेकशः
मारुतिस्तु कीर्त्यते भक्तराज एव सः ॥३४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकदा शनिर्ग्रहः पर्यटन् समागतः
मारुतिं व्यलोकयत् कुत्रचित् तरोरधः ।
तत्र चाञ्जनासुतः सन्निमील्य लोचने
राम ? राम ? राम ? इत्येवमुच्चरन् स्थितः ॥३५॥

तं शनैः शनैश्चरन्नागतं शनैश्चरम्
प्राणमत् स मारुतिः श्रद्धया रवेः सुतम् ।
ऊचिवानहन्तु भो नाम-कीर्तनेऽस्म्यहम्
कोऽसि किङ्करोऽसि कोऽर्थस्त्वमागतः कथम् ॥३६॥

"पृष्टवान् कपिर्यदा तं शनैश्चरोऽब्रवीत्
सूर्यसूनुरस्म्यहं नास्ति मत्समो बली ।
योधनाय चागतस्तीव्रसङ्गरेप्सया
स्पर्धितुं त्वमेव दृष्टो मयेश्वरेच्छया ॥३७॥"

"त्वं विवस्वतः सुतोऽहं च तस्य शिष्यकः
योधनं कथं भवेदावयोर्द्वयोर्मिथः ।
अन्यकेन केनचित् सार्धमेव युद्ध्यताम्
रामकीर्तने रतोऽस्म्यत्र देव गम्यताम् ॥३८॥"

"नास्ति चेत् युधेषणा मास्तु ते परन्त्विह
राघवः कुतोऽस्त्यसौ ? मार्गमत्र निर्दिश ।
तेन साकमेव मे योधनं भवेदिह"
मारुतिं तमूचिवान् स्पर्धया शनैश्चरः ॥३९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

"राघवस्तु व्यापृतो राज्य-कर्मणि क्षणम्
नास्ति योधनाय भोस्त्वं तु युध्यसे कथम्।
कञ्चिदन्यकं स्वकं द्वन्द्विनं च मार्गयन्
याहि भो शनैश्चर त्वं द्रुतं द्रुतं चरन् ॥४०॥"

"त्वं स्वयं न युद्ध्यसे राघवो न युद्ध्यते
ज्ञायते मया त्वया चातुरी प्रदर्श्यते।
आतुरोऽस्मि वानर प्रेहि युद्धमाचर
सङ्गराय मत्पुरो वर्ततेऽद्य नापरः ॥४१॥

एह्यथ त्वया सहैवाजिरं करोम्यहम्"
सौरिराकृषत् दृढं तत्र मारुतेः करम्।
मारुतिः समीयिवाँस्तत्र दुर्ग्रहं शनिम्
तोलयन् गदां पुरो वासवो यथा शनिम् ॥४२॥

मारुतिस्त्वनिच्छुरप्येव युद्ध-कर्मणि
स्पर्धितोऽथ सौरिणा प्रोद्यतोऽभवद् युधि।
तेन पुच्छकः स्वको वर्धितः क्रमेण ह
आशिखं शनैश्चरं तं दृढं बबन्ध सः ॥४३॥

घट्टकं शिलामयं पर्वतं नभःस्पृशं
मारुतिश्च पुप्लुवे काननं सकण्टकम्।
आञ्जनेयशक्तितः सोऽभवत् पराजितः
पीडया मुहुर्मुहुर्विव्यथे हतप्रभः ॥४४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

तप्तवालुकामये रोधसि व्यलुण्ठयत्
शैलश्रृङ्गतस्ततोऽधस्तदा न्यपातयत् ।
घूर्णयन् मुहुर्मुहुः क्षिप्तवान् विहायसि
विक्लवः शनैश्चरो विव्यथे स्खलन् भुवि ॥४५॥

सौरिराह भास्करस्यात्मजोऽस्मि मारुते
दृप्त-दर्पकोऽभवं क्षम्यतां निवेदये ।
नावयोरितो मिथो वैरभाव इष्यते
त्वत्समो बली क्षितौ नैव कोऽपि दृश्यते ॥४६॥

तैलमस्तिचेत् क्वचित् मर्द्दनाय दीयताम्
पीडितोऽस्म्यहं भृशं भोः ? कृपा विधीयताम् ।
मारुतिर्गतः क्वचित् तैलमानयत् ततः
सौरये प्रदत्तवान् स्वं वपुः सिषिञ्च सः ॥४७॥

दृप्तदर्पकोऽप्यसौ शान्तगर्वकोऽभवत्
सङ्गरे पराजितः सङ्गरं तदाकरोत्
वासरे शनौ जनो यो ददाति तैलकम्
तं कदाप्यहं क्षितौ नैव पीडयाम्यहम् ॥४८॥

निर्गतः शनैः शनैः सञ्चरन् शनैश्चरो
मारुतिस्ततोऽभवत् कर्मणि स्वके रतः ।
सङ्गतास्तदाखिला दर्शका जयं जगुः
कीर्तयन्त एव ते मारुतेर्यशो ययुः ॥४९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

एकदा तु जानकी प्राङ्गणेऽभवत् स्थिता
मूर्द्धज-प्रसाधनं कर्तुमेव सोद्यता ।
मारुतिः पुरो गतो भक्षणाय याचते-
"अम्ब ! देहि मोदकं मां क्षुधा विबाधते ॥५०॥"

"भोः कपे क्षणं प्रतीक्षस्व किञ्चिदेव हि
मोदकान्यहं ददाम्येव संशयो न हि ।"
मूर्द्धजप्रसाधने मैथिली रताभवत्
मारुतिः पुरः स्थितस्तां दृढं व्यलोकयत् ॥५१॥

वीक्ष्य दर्पणे मुखं कज्जलं शलाकया
बिभ्रतीं च मैथिलीं नागसम्भवं तदा ।
मारुतिर्विलोकयन् एव विस्मयान्वितः
पृष्टवान् स मातरं हेतुरत्र किं वद ॥५२॥

आञ्जनेय ? शोभनार्थन्तु कज्जलं कृतम्
नागसम्भवं च मे भाग्य-वर्धकं स्मृतम् ।
राघवस्य चायुषो वर्धनाय भक्तितो
नित्यमेव मूर्ध्न्यहं धारयामि पुत्रक ॥५३॥

भाल-बिन्दुमात्रतश्चायुरेधतेऽथ चेत्
किं न लिप्यतेऽखिले देहके वरं भवेत् ।
मारुतिर्विचिन्तयन्नेव तत्क्षणं ययौ
ह्याशिखं विलिप्य सिन्दूरकं भृशं बभौ ॥५४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राघवस्य चायुषो वर्धने भिलाषुकः
नागसम्भवाङ्कितो नागरङ्ग-सन्निभः ।
नागहारिणोंऽशधृक् लब्धलोहितच्छवि-
र्दर्शनाय निर्गतो राम-राजसंसदि ॥५५॥

राघवेऽतिभक्तितो नागसम्भवाञ्चितो
दृश्यते कपिर्यथा रूपके विदूषकः ।
कर्म मारुतेरिदं हास्य-तत्त्वपोषकं
सञ्जातास्तदाविदुर्मूढता-प्रदर्शकम् ॥५६॥

आञ्जनेय किं कृतम् रक्तिमं वपुः कथम्
वैरिभिः प्रयुध्यभोस्त्वं समागतोऽसि किम् ।
जातु प्रच्युतो गिरेः कूर्दमान एव ह
पृष्टवान् जनः कुतो नागसम्भवाञ्चितः ॥५७॥

मारुतिः प्रोक्तवान् तत्र सिन्दूरकम्
सीतया भालके बिन्दुमात्रं धृतम् ।
आयुषो वर्धकं तन्मया चाशिखम्
लिप्तमेतद् सखे ? राघवार्थन्त्विदम् ॥५८॥

राघवो नृपासनान्मारुतिं व्यलोकयत्
सोऽश्रुपूरितेक्षणः स्नेहगद्गदोऽवदत् ।
मङ्गलाय मे त्वया हे कपीश यत्कृतं
नास्ति कुत्रचित् क्षितौ तस्य वै निदर्शनम् ॥५९॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

राघवो मारुतेरग्रतः प्राप्तवान्
स्वं सखायं स गाढं परिष्वक्तवान् ।
आशिखं तस्य देहोऽपि संसर्गत-
स्तत्र सिन्दूर-रागारुणोऽदृश्यत ॥६०॥

मारुती राघवौ रक्तदेहौ स्थितौ
तावुभावप्यभिन्नौ मनोज्ञौ वरौ ।
वानरो वा नरो वा न भेदस्तयोः
काप्यभिख्या तदा ख्यापिताभूत् तयोः ॥६१॥

मारुतेश्च रक्तिमा राघवस्य रक्तिमा
दृश्यते मनोज्ञता तत्र चोभयोः समा ।
राघवस्य चायुषो वर्द्धको गदाधरः
माारुतेस्तथायुषो वर्द्धको धनुर्धरः ॥६२॥

आञ्जनेयो हरिः कौशलेयो हरि
नास्ति भेदो भवाब्धेरुभौ द्वौ तरी ।
विष्णुरेकः स्वयं रुद्ररूपोऽपरो
लोकरक्षार्थमेवं जनुर्गृह्णतः ॥६३॥

रामदम्पती स्थितावाञ्जनेयवक्षसि
मारुतिश्च शोभितो रामसीतयोर्हृदि ।
ईशभक्तयोर्मिथश्चेतसोः स्थितिस्तदा
ब्रह्म-जीवयोरभूदेकतोपपादिका ॥६४॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

मारुतिः पुरस्कृतस्तत्र राघवेण हि
आञ्जनेय-सन्निभः कोऽपि मत्प्रियो नहि ।
अग्रपूजनं भवेत् श्रीहनूमतोऽद्यतः
कौशलेय ऊचिवान् मारुते सदा जय ॥६५॥

भवान् देहतः सेवको मे सदैव
परं जीवदृष्ट्या त्वमंशो ममैव ।
द्वयोर्वस्तुतश्चावयोर्नास्तिभेद-
स्त्वदीयोऽहमेवं मदीयस्त्वमेव ॥६६॥

सेव्य-सेवकौ मिथः स्वायुषो विवर्धकौ
नागरङ्ग-लाञ्छितौ शोभनौ हरी इमौ।
रूद्र-विष्णुरूपिणौ भक्तकामदौ वरौ
सूर्यचन्द्रवच्चिरं जीवतामुभावपि ॥६७॥

आञ्जनेय ? आयुषो वर्धनं विधीयतां
जीवनं यशस्करं राघव ? प्रदीयताम् ।
भक्तिमप्यहैतुकीं मैथिलि ? प्रदेहि मे
राष्ट्रशान्तिमप्यथो सर्वतः प्रवर्तताम् ॥६८॥

नाम्नैवेह शुभं हनूमदयनं श्रीरामभक्तिप्रदं
शास्त्रेषु प्रथिताञ्जनेयसुकथाः सङ्गृह्य च प्रस्तुतम् ।
सद्यो दुर्ग्रह-शान्ति-कारकमथो सद्बुद्धि-विद्याकरम्
आत्रेयेण च विष्णुराजकविना काव्यं मयोपाहृतम् ॥६९॥

आत्रेयोपाभिधेनेह विष्णुराजेन भक्तितः ।
हनूमदयने पञ्चदशः सर्ग इहेरितः ॥७०॥

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

Jayatu Sanskritam, Kathmandu, Nepal

CC-0. Digitized by eGangotri and MIDF- Delhi

हनूमदयनमहाकाव्यम्

प्रो.डा. विष्णुराज आत्रेयः नव्य व्याकरणाचार्यः
विद्यावारिधिः, एम. ए. नेपाल्याम् राजनीतिशास्त्रे च
जन्म : १९४९ ई. रश्मिनिलय, कपिलवस्तु, नेपाल।
स्थान संकेतः : १०४ अरनिको मार्गः बत्तिस पुतली, काष्ठमण्डपः

प्रकाशितेषु कानिचन संस्कृत पुस्तकानि-

१. किमुपहरामि (कवितासङ्ग्रहः वि.सं. २०३६)
२. सरला (उपन्यासः वि.सं. २०३६
३. व्यथाविधा (खण्डकाव्यम् वि.सं. २०५३)
४. श्रीशङ्कराचार्यः (काव्यम् वि.स. २०५३)
५. धन्यो हिमवद्देशः (राष्ट्रियकाव्यम् वि.स. २०५५)
६. संस्कृत-नेपाली अंग्रेजी तद्भव शब्दकोशः (वि.सं. २०६९)
७. संस्कृत- अंग्रेजी नेपाली सहज शब्दकोश (वि.सं. २०७०)
८. हनूमदयनमहाकाव्यम् (वि.सं. २०७१)
९. संस्कृत-उर्दु नेपाली हिन्दी अंग्रेजी तद्भव शब्दकोशः (वि.सं. २०७२)

प्रकाशनोन्मुखानि-

१०. संस्कृत-नेवारी नेपाली अंग्रेजी तद्भव शब्दकोशः
११. पाणिनिः (उपन्यासः नेपाल्याम्)
१२. अहल्या (खण्डकाव्यम् अवधी भाषायाम्)
१३. नेपाल के संस्कृत साहित्यकार (हिन्द्याम्)

ISBN 9937210393-3
9789937210393

मेरो भनाई

नेपालको कौशिकी तटका ऋषि विभाण्डकका छोरा शृङ्गीको जन्म वाणगङ्गा सिङ्गीघाटमा भएको हो। यिनले रेसुङ्गामा तपस्या गरेर सिद्धि प्राप्त गरे। शृङ्गी र शान्ताको आचार्यत्वमा अयोध्यामा पुत्रेष्टि यज्ञ भएपछि राजा दशरथका चार छोराहरूको जन्म भयो। यसै यज्ञको पायस पवनदेवको माध्यमले अञ्जनाले खाइन् अनि पवनपुत्र हनूमानजीको जन्म भएको हो। कौशिक विश्वामित्रले आफ्नो आश्रममा ल्याएर राम र लक्ष्मणलाई दीक्षित गरेका हुन्। काकभुशुण्डीको जन्म र मुक्तिनाथ नारायणका वाहन गरुडजीसँग उनको सम्वाद भएको ठाउँ पनि कागवेणी तीर्थ नै हो भन्ने धेरैको भनाइ छ।

यी सबै कुरालाई समेटेर नेपालको पृष्ठभूमिमा एउटा रामकथाको आवश्यकता छ भन्ने कुरा श्री १००८ कालीदास बाबाले पनि भन्नुहुन्थ्यो। पवनपुत्र हनूमानलाई नै नायक बनाएर प्रो. डा. विष्णुराज आत्रेयजीले हनूमदयनमहाकाव्यम् रचना गरेर यो काम सम्पन्न गर्नुभएको छ।

नेपाल र भारतमा मात्र होइन, थाइल्याण्ड, श्रीलंका, इन्डोनेसिया आदि देश पनि रामायणी संस्कृतिसँग जोडिएका छन्। मर्यादा पुरुषोत्तम श्रीराम तथा जनक नन्दिनी सीताजीको आदर्श दाम्पत्य र मर्यादानुकूल जीवन संसारभरिका लागि उदाहरणीय छ।

धर्म संस्कृति र मानव मूल्यको ह्रास हुँदै गरेहेको यस डर लाग्दो अवस्थामा मानव समाजलाई एकता सूत्रमा बाँध्ने काममा संस्कृत वाङ्मयको ठूलो योगदान हुन सक्दछ। थाइल्याण्डमा हुन लागेको सोह्रौं विश्व संस्कृत सम्मेलनमा यो महाकाव्य लोकार्पित हुने थाहा पाएर मलाई झन् खुसी लागेको छ। प्रो. आत्रेयको यशस्वी जीवनका लागि परमेश्वरसँग प्रार्थना गर्दछु।

– नारायण जी रौनियार

Jayatu Sanskritam, Kathmandu, Nepal